मानविषयेवत्त्वादिप्रत्यक्षं प्रति वन्यादिप्रत्यक्षं प्रति वन्यादिप्रत्यक्षेच्छाविरहविशिष्टवन्यानुमितिसामग्र्या अन
नुगतेच्छाभावाकूटानुगतेच्छाभावविशिष्टसिद्ध्यभावघटितायाः प्रतिबंधकत्वे सर्वपक्षिणामवश्यं वाच्यं॥ अन्यथा सि
द्धिकाले परामर्शाद्यनुमितिकारणसमूहसत्वेन मते वह्निप्रत्यक्षानुत्पत्त्यापत्तेः॥ तथा चाननुगतेच्छाभावानुगतेच्छा
भावसिद्धीनां परस्परविशेष्यविशेषणभावे विनिगमनाविरहेणानंतसामग्रीप्रतिबंधकभाववहत्यप्रयुक्तगौ

रवस्पष्टर्वपक्षिमतेपिगुरुद्दूरस्तांतात्॥ सिद्धांतिमतेतुप्रत्यक्षेच्छाभावविशिष्टानुमित्याविशिष्टानुमितिसामग्रीप्रतिबंधकता
वच्छेदककोटौतथाविधसिद्ध्यभावस्यानिवेशेप्रयोजनाभावेनानुमित्याविशिष्टअनुमितिसामग्रीदशायांसिद्धिकालेअ
नुमितेरेवोत्पत्त्याप्रत्यक्षानुत्पादेनव्यभिचाराभावान्नोपदर्शितरीत्याविशेष्यविशेषणभावेविनिगमनाविरहेपाप्रबं
ध्यप्रतिबंधकताववाकुल्पमितिसिद्धांतिमतमेवसर्वसमतमाभाति॥ एवंसमानविषयेभिन्नविषयेवास्पार्शनसा
मग्रीसत्त्वेचाक्षुषसामग्रीसत्त्वेचाक्षुषस्यैवोत्पत्तेस्त्वचुतरंपश्यामीत्यनुव्यवसायात्॥ तथाचतत्रस्पार्शनवार
णायस्पार्शनंप्रतिस्पार्शनेच्छाविरहविशिष्टापाश्चाक्षुषसामग्र्याप्रतिबंधकत्वंकल्प्यं॥ अथकेनरूपेणातयोःप्र
तिबध्यप्रतिबंधकभावः॥ नतावत्स्पार्शनत्वावच्छिन्नंप्रतिस्पार्शनेच्छाविरहविशिष्टचाक्षुषसामग्रीत्वेनतथास
तिघटेचाक्षुषस्पार्शनसामग्रीकालेपटेस्पार्शनेच्छासत्त्वेअसंसांपटस्पार्शनसामग्रीघटस्पर्शनापत्तेः॥ ना
पिघटादिस्पार्शनंप्रतिघटादिस्पार्शनविषयकेच्छाभावविशिष्टचाक्षुषसामग्रीत्वेनप्रतिबध्यप्रतिबंधकभा
वः॥ घटचाक्षुषसामग्रीकालेघटस्पार्शनसामग्रीदशायांघटत्वांनंजापनामितीच्छासत्त्वेघटस्पार्शनापत्तेः॥
नचेष्टापत्तिः॥ स्वभावतोबलवतीयासामग्रीतद्विषयकेच्छासत्त्वेतस्यैवोत्पादनियमात्॥ नचतथाविधस्पार्शनप्र

ति तथाविधस्पार्शनत्वप्रकारकेच्छाविरहविशिष्टचाक्षुषसामग्रीत्वेन प्रतिबंधकत्वकल्पनान्नोक्तदोषइतिवा
च्यं॥ तथा सति पटचाक्षुषसामग्रीकाले घटस्पार्शनसामग्रीसत्वे घटज्ञानं जायतामितिच्छासत्वे घटस्पार्शनानु
पपत्तिरिति चेत् मैवं॥ घटादिस्पार्शनं प्रति घटादिस्पार्शनत्वप्रकारकेच्छाविरहविशिष्टघटादिचाक्षुषसामग्रीस
त्वेन घटादिस्पार्शनं प्रति घटादिस्पार्शनविषयकेच्छाविरहविशिष्टपटचाक्षुषसामग्रीत्वेनापि प्रतिबंधकत्वं क
ल्प्यं॥ चाक्षुषसामग्रीतउद्भूतरूपादिविशिष्टविजातीयवृक्षः संयोगरूपा वैशिष्ट्यं वस्त्वाश्रयसमवेतत्वरूपपरंपरा
संबंधेन एव चाक्षुषसामग्र्यामपि स्वसमवायनिरूपितोपदर्शितपरंपरासंबंधावच्छिन्नवृत्तित्वरूपपरंपसंबंधा
वच्छिन्नप्रतियोगिताकस्पार्शनेच्छाभाववैशिष्ट्यं दैशिकविशेषणताविशेषसंबंधेन निवेशनीयमिति लेशोपि
अथवा सामान्यतः स्पार्शत्वेनेवच्छिन्नप्रतिस्वीयस्पार्शननिष्ठविशेष्यतानिरूपितविषयितासंबंधावच्छिन्नप्रका
रताश्रयसमवेतत्वरूपपरंपरासंबंधावच्छिन्नप्रतियोगिताकस्पार्शनत्वप्रकारकेच्छाविरहविशिष्टचाक्षुषसाम
ग्रीत्वेनैकं॥ अपरं च स्पार्शनं प्रति चाक्षुषसामग्रीविशिष्टस्वीयस्पार्शननिष्ठविशेष्यतानिरूपितविषयतासं

बंधावच्छिन्नप्रतियोगिताकस्पार्शनविषयकेच्छाभावत्वेनापि प्रतिबंधकत्वं कल्प्यतीयं नातीविषयभेदेनानंतप्रति
बध्यप्रतिबंधकभावबाहुल्यापत्तिः ॥ स्पार्शनेच्छाभावे चाक्षुषसामग्रीविशिष्टस्यैकत्वालीनत्वसंबंधेन तत्पुरुषी
पत्वादिनिवेशप्रकारणाभावकल्पनानामानुपपत्तिः ॥ अत्र प्रथमप्रतिबध्यप्रतिबंधकभावे प्रतिबध्यतावच्छेदकसं
बंधो विषयत्वं प्रतिबंधकतावच्छेदकश्च समवायः ॥ न तु रूपीयत्वनिवेशप्रतिबध्यप्रतिबंधकभावकल्पना
नुपपत्तिः ॥ द्वितीयप्रतिबध्यप्रतिबंधकभावे विषयत्वं प्रतिबध्यतावच्छेदकसंबंधः; विशेषणताविशेषसंबंधः
प्रतिबंधकतावच्छेदकः ॥ एवं चाक्षुषेच्छाविशिष्टचाक्षुषसामग्रीकाले स्पार्शनेच्छादशायां स्पार्शनवारणाय
घटादिस्पार्शनं प्रति घटादिचाक्षुषत्वप्रकारकेच्छाविशिष्टघटादिचाक्षुषसामग्र्याः प्रतिबंधकत्वमेकं ॥ अप
रं च घटादिस्पार्शनं प्रति घटादिचाक्षुषविषयकेच्छाविशिष्टघटादिचाक्षुषविषयसामग्रीत्वेन प्रतिबंधकत्वं
कल्प्यं ॥ अथवा तत्रापि विषयमनिवेश्य स्पार्शनत्वावच्छिन्नं प्रति स्वीयचाक्षुषनिष्ठविशेष्यतानिरूपितविषय
तासंबंधावच्छिन्नप्रकारताश्रयसमवेतत्वस्वसमवायापिनिरूपितोपदर्शितस्वाश्रयीभूतचक्षुःसंयुक्तत्वा

रा.
१२

१०

द्विघटितपरंपरासंबंधावच्छिन्नवृत्तित्वाभावसंबंधेन चाक्षुषत्वप्रकारकेच्छाविशिष्टचाक्षुषसामग्रीप्रतिबंधिका
प्रतिबध्यताबध्यतावच्छेदकसंबंधः समवायः प्रतिबंधकतावच्छेदकसंबंधश्च स्वाश्रयीभूतत्वक्संयुक्तमनः
प्रतियोगिकविजातीयसंयोगरूपपरंपरासंबंधः ।। नानाविषयभेदेन पुरुषभेदेन चानंतप्रतिबध्यप्रतिबंधकभा
वकल्पना एवं स्पार्शनत्वावच्छिन्नं प्रति चाक्षुषविषयकेच्छाविशिष्टचाक्षुषसामग्रीकालीनस्पार्शनेच्छादशायां स्पा
र्शनत्वावच्छिन्नं प्रति चाक्षुषविषयकेच्छाविशिष्टचाक्षुषसामग्र्या अपि प्रतिबंधकता बोध्या ।। नातो भिन्नविष
ये चाक्षुषविषयकेच्छाविशिष्टचाक्षुषसामग्रीकालीनस्पार्शनेच्छादशायां स्पार्शनापतिः ।। अत्र चाक्षुषसामग्र्या
चाक्षुषेच्छाविशिष्टत्वं च स्वीयचाक्षुषनिष्ठविशेष्यतानिरूपितविषयतासंबंधावच्छिन्नप्रकारताश्रयीभूतत्व
संयोगाद्यभाववत्समवेतत्वस्वसमवायिनिरूपितोपदर्शितपरंपरासंबंधावच्छिन्नवृत्तित्वाभावसंबंधेन निवेश्यं
नात समाने विषये घटत्वानं जायतां घटस्पार्शनं जायतामितीच्छासत्त्वे घटचाक्षुषसामग्रीकाले तत्स्पार्शनानु
पपत्तिः ।। न वा एकपुरुषस्य चाक्षुषेच्छासत्त्वे पुरुषांतरस्य चाक्षुषसामग्रीकाले स्पार्शनेच्छाविशिष्टस्पार्शनसा
मग्रीदशायां स्पार्शनानुपपत्तिः ।। अत्रापि प्रतिबंधकतावच्छेदकसंबंधः उपदर्शितपरंपरारूपः ।। प्रतिबध्य

तावच्छेदकस्य समवायः॥ मानातः पुरुषभेदे प्रतिबध्यप्रतिबंधकभाववृद्धिरिति॥ एवं घटादिस्पार्शनेछाविशिष्टघटादि
स्पार्शनसामग्रीकाले घटादिचाक्षुषेछाभावदशायां घटादिचाक्षुषवारणाय घटादिचाक्षुषं घटादिचाक्षुषेछाविरह
विशिष्टस्पार्शनसामग्र्या अपि प्रतिबंधकत्वं बोध्यं॥ अत्रापि समानविषयभिन्नविषयनिवेशभेदेन प्रतिबध्यप्रतिबंध
कभाववैरूप्यं विषयमनिवेश्यैव वा प्रतिबध्यप्रतिबंधकभाववैरूप्यं सूक्ष्ममतिभिर्विभाव्यं कल्प्यं॥ केचित्तु चाक्षुषसामग्रीकाले
स्पार्शनसामग्रीसत्वे सर्वत्र स्पार्शनमेवोपेयं तेन चाक्षुषं चाक्षुषं सामग्री आलोकचाक्षुषः संयोगघटितायां त्वक्संयो
गादिघटितस्पार्शनसामग्र्यपेक्षया गुरुत्वेन लघुभूतायाः स्पार्शनसामग्र्याः प्रतिबंधकत्वकल्पनेन लाघवसंभवादित्याहुः॥ त
इसत् तथा सति चाक्षुषेछाविशिष्टचाक्षुषसामग्रीकाले स्पार्शनेछाभावदशायां स्पार्शनापत्तिवारणाय स्पर्शनं प्रति स्पार्श
नेछाविरहविशिष्टचाक्षुषेछाविशिष्टचाक्षुषसामग्र्या आलोकसंयोगचक्षुःसंयोगादिघटितत्वेन गुरुभूतायाः प्रतिबंधक
त्वकल्पने स्पार्शनेछाभावचाक्षुषेछयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावाधिक्यं॥ प्रति
बंधकतावच्छेदकशरीरगौरवं चदुष्परिहरमेव॥ सिद्धांतिमते तु स्पार्शनेछाभावचाक्षुषेछयोर्विभिन्नप्रतिबंधकतावच्छेदक
कोटौ निवेशेनैकत्रानिवेशेन प्रतिबंधकतावच्छेदकशरीरगौरवमिति॥ न च सिद्धांतमतेपि स्पार्शनसामग्रीकाले चाक्षु

९३

षेच्छाभावदशायां चाक्षुषवारणायावश्यं चाक्षुषेच्छाविरहविशिष्टस्पार्शनेच्छाविशिष्टस्पार्शनस्पार्शनसामग्र्याः प्रतिबंध-
कत्वं कल्प्यं॥ तथा च तत्र चाक्षुषेच्छाभावस्पार्शनेच्छयोरेकत्र निवेशनविशेष्यविशेषणभावे विनिगनाविरहेयाप्रतिबध्य-
प्रतिबंधकभावबाहुल्यं॥ प्रतिबंधकतावच्छेदकशरीरगौरवं च तन्मते विद्यमानमेवेति फललाघवावकाश इति वाच्यं॥ उ-
पदर्शितरीत्या स्पार्शनसामग्रीमेव चाक्षुषसामग्र्या गुरुत्वेन स्पार्शनेच्छाभावचाक्षुषेच्छोभयविशिष्टगुरुसामग्री प्रतिबं-
धकतावच्छेदकशरीरस्य चाक्षुषेच्छाभावस्पार्शनेच्छोभयविशिष्टलघुस्पार्शनसामग्रीप्रतिबंधकतावच्छेदकशरीरापे-
क्षया[illegible]तरां गुरुत्वेन पूर्वपक्षिमत एव गुरुत्वादित्यलमसदावेशेन॥ केचित्तु विषयतासंबंधेन द्रव्यस्पार्शनं प्रतित्वङ्मन-
नोयोगस्येंद्रियमनोयोगविधयाऽवच्छेदकतासंबंधेन हेतुत्वकल्पनमावश्यकं॥ तथा च चाक्षुषसामग्रीकाले त्वङ्मनो-
योगादिघटितस्पार्शनसामग्रीदशायां विषयेऽवच्छेदकतासंबंधेन त्वङ्मनोयोगस्यानभ्युपगमात्॥ तथा सतींद्रियत्वेन
फलबलकल्प्यत्वात्॥ तथा च तदभावेन स्पार्शनाभावोपपत्तिः॥ स्पार्शनप्रति चाक्षुषसामग्र्याः प्रतिबंधकत्वकल्पनं
निर्युक्तिकमेवेत्याहुः॥ तदसत्॥ विषयतासंबंधेन प्रत्यक्षं प्रतिऽवच्छेदकतासंबंधेनेंद्रियमनोयोगस्य हेतुत्वे प्रत्यक्षं य-
॥

तिविषयेंद्रियमनोयोगस्यहेतुत्वविलोपापत्तिः॥ विषयेसन्निकर्षशून्यदशायां विषयेऽवच्छेदकतासंबंधेन इंद्रियमनोयोगादि

गस्यकारणाभावाभ्युपगमेनैवतत्प्रत्यक्षवारणसंभवादिति समवायसंबंधेन प्रत्यक्षं प्रति इंद्रियमनोयोगस्य स्वाश्रयी

भूतमतः प्रतियोगिकसंयोगवत्त्वरूपपरंपरासंबंधेनकारणत्वं कल्प्यं। तथा च चाक्षुषसामग्रीदशायां स्पार्शनसाम

ग्रीकाले चाक्षुषोत्पत्त्यर्थमवश्यं त्वङ्मनोयोगः स्वीकरणीयः जन्यज्ञानत्वावच्छिन्नं प्रति त्वङ्मनोयोगत्वेन हेतुतायाः

कुण्ठत्वेनेति कुण्ठकार्यकारणभावेन स्पार्शनानुपपत्तेरनिर्वाहे अवश्यं स्पार्शनं प्रति चाक्षुषसामग्र्याः प्रतिबंधक

त्वकल्पनमावश्यकमेवेति दिक्॥ इति श्रीरघुदेवभट्टाचार्यविरचितः सामग्रीविचारः समाप्तः॥

श्रीगणेशाय नमः ॥ संकेतो लक्षणा चार्थोपस्थापकः । वृत्त्या तत्प्रतिपाद्य एवार्थ इत्यभिधीयते इदं पदमिममर्थं बोधयत्विति अस्मा-
त्पदादयमर्थो बोद्धव्य इति वेच्छा संकेतरूपा वृत्तिः । स आधुनिकः संकेतः परिभाषा तया वाच्यार्थबोधकं पदं पारिभाषिकं यथा शास्त्रका-
रादिसंकेतित नदीवृद्ध्यादिपदं । ईश्वरसंकेतः शक्तिस्तयार्थबोधकं पदं वाचकं । यथा गोत्वादिविशिष्टबोधकं गवादिपदं । तद्बो-
ध्यो गोत्वादिर्वाच्यः सएव मुख्यार्थ इत्युच्यते वाच्यवाचकादिपदे ईश्वरेच्छाप्रबोधकत्वे न या विषयतासैव धात्वर्थः तस्मात्सा-
श्रयत्वरूपं कर्तृत्वं पदे कर्तृप्रत्ययेन बोध्यते पदं गावकि गां वृते गौर्वाच्यक मित्यादौ कर्मप्रत्ययेन तेनार्थवाचकपदेन तत्तदर्थविष-
यकत्वरूपत्वात्मकमर्त्वं धात्वर्थैकदेशे बाधे बोध्यते पदेन गौरुच्यते पदस्य गौर्वाच्य इत्यादौ पदनिष्ठ धात्वर्थीभूत तादृशविषयता-
ना ... यानिरूपितत्वं तत्र धात्वर्थीभूत तादृशविषयतानिरूपकबोधजनकत्वप्रकारतां तं पाति बोधविषयतानिरूपक-
विषयतासंबंधावच्छिन्नप्रकारताश्रयत्वरूपं तादृशशक्तिपाकमर्त्वं गवादौ कर्माख्यातेन बोध्यते इति तेयेच्छायाः संकेतरूपत्वे वै-
परीत्यमप्यमिति न्यायसिद्धान्तः । अत्र मीमांसकानुयायिनः । अपभ्रंशादपि शक्तिभ्रमेणार्थप्रत्ययात्तन्मात्रविषयक भगवत्सं-
केतस्यापि बोधकत्वेन विषयत्वमिति नैयायिकैरभ्युपगमात्तस्यापि शक्त्वं साधुत्वं च स्यादेवं लाक्षणिक गंगादिपदस्यापि कु-
त्यान्तीरादिवाचकत्वापत्तिः यत्तु तादृशेच्छया भगवदुच्चरितत्वं वाचकत्वं अयमर्थ्याद्यस्मान्नार्थप्रत्यायनेच्छया भगवदुच्चरितत्वं इ-
ति तत्र तेप्रसंग इति तन्न अस्मदाद्युच्चरितपदेष्वव्याप्तेः भगवदुच्चरितजातीयत्वनिवेशेपि वेदस्य लाक्षणिकपदेष्वव्याप्तेः ॥

साद्दिदेवदत्तादिपदेऽप्यासेश्वरद्वारशेहित्पिनानामकुर्यादितिवेदेनामपदस्यदेवदत्तादिपदपरत्वेपिदे वृद्धनरत्यादिप
दस्वरूपाणांभगवदनुच्चरितत्वात् एवंईश्वरसंकेतस्यशक्तित्वेईश्वरानंगीकर्तृनयेशाब्दबोधानुपपत्तिः अथशाब्दबो
धोपयोगितायामीश्वरीयत्वमनुपादेयः एवंचाधुनिकसंकेतज्ञानादपिशाब्दबोधःताद्दशसंकेतस्यवृत्तित्वंचनिहेति
नचाधुनिकसंकेतस्यवृत्तित्वेतात्पर्यस्यापितथात्वप्रसंगः तस्यापिबोधकत्वेनपदविषयकतयासंकेतरूपत्वात् नचेष्टा
पत्तिः तथासतिलक्षणास्थलेतात्पर्यस्यवृत्तितापत्तिःलक्षणाभावृत्तित्वोच्छेदप्रसंगादितिवाच्यं यतःपदार्थोपस्थितिव्यापा
रकःसंकेतोवृत्तिःतात्पर्यज्ञानंचसाक्षादेवशाब्दबोधोपयोगिनतुपदार्थोपस्थितिद्वाराइत्युपस्थापिपदार्थएवप्रकरणादि
नावच्छेद्यपर्यवधारणात् नचैवमपिसंकेतस्यसंबंधत्वेमानाभावेननिष्प्रतियोगिकतयातदसंभवेनपदार्थोपस्थापकता
संभवेनचवृत्तित्वानिर्वाहात् एतेनशाब्दबोधोपयिकसंबंधत्वेनईश्वरसंकेतज्ञानंहेतुः तच्चमीमांसकानामपिसंभवतितादृ
शज्ञानविपरीतज्ञानाभावादित्यपिनिरस्तं यत्तुस्वजन्यबोधविषयत्वप्रकारकेच्छाविषयत्वमर्थपदसंबंधःपदे चार्थस्य
विपरीतः अस्यसंबंधत्वमन्यथानुपपत्याकल्प्यते एतादृशपरंपरायाअपभ्रंशस्थले संबंधतानस्वीक्रियतेइतितत्रसं
बंधावगाहिज्ञानंभ्रमएवेतिसंप्रदायतदपितुच्छं अजकुभस्यतादृशेच्छाविषयत्वस्यसंबंधत्वोपगमेतादृशज्ञानवि षयत्वस्य
समानकालीनज्ञानविषयत्वादिपरंपरायाअपिविनिगमनाविरहेणसंबंधताप्रसंगात् तस्मात्पदपदार्थयोःसंबंधांतर

मेव वाच्यवाचकभाव इति वदंति। वस्तुतस्तु तत्तज्ज्ञानशक्यत्वं तद्वाचकत्वं तच्च तद्विषयकशाब्दबोधजनकतावच्छेदकधर्मवत्त्वं तच्च धर्मो वि
न्यायादिनिष्ठा हाऽतुरूपा शक्तिरिव पदार्थांतरमेव लाक्षणिकं यानुभावकमेवेति न तत्र शक्तिः घटादिपदस्यैमितिमातृविषयकधीज
नकत्वेपि न तद्वाचकत्वं तद्विषयकत्वावच्छिन्नज्ञानजनकज्ञानशक्यपदस्यैव तद्वाचकत्वात् मितिमातृविषयकत्वेन च ज्ञानस्य न
किंचित्पदशक्यता: ज्ञानसामान्यसामग्र्या एव मितिमातृभासकतया पदानां तस्य च तदर्थाभासकतया। तद्विषयकत्वस्य एतत्पद
जन्यतावच्छेदकत्वे मानाभावात् कार्यान्वितस्वार्थे पदानां शक्तिरिति वादिनां गुरूणां साक्षात्परंपरासाधारणकार्यत्वविषयता
निरूपितत्वेन घटादिविषयतया घटादिपदजन्यतावच्छेदकत्वेपि न घटादिपदस्य कार्यतावाचकत्वमपि तु लिङादिपदस्यै
व तद्विषयकत्वावच्छिन्ने यत्र साक्षात्परंपरासाधारणानिरूपितत्वाविशेषणतयावच्छेदकत्वस्यैवानिवेशात् न च कार्यानुकूलश
क्तेः स्वरूपसत्तायैव कार्यानुकूलत्वापदार्थोपस्थितौ शाब्दबोधे च तत्तानोपयोगिनोर्धेपदस्य तन्निरूपणस्यैतरस्य स्वीकारस्या
वश्यकत्वमिति वाच्यं दहनादिकार्ये वह्न्यादिनिष्ठशक्तेः स्वरूपसत्त्वा एवोपयोगित्वेपि शाब्दबोधानुकूलशक्तेः शाब्दबोधे पदार्थोप
स्थितौ च ज्ञाततोपयोगित्वोपगमे बाधकाभावात् अतीतानागतपदज्ञानादपि शाब्दबोधोत्पत्त्यापत्तानाम हेतुत्वेन तत्र हेतुताव
च्छेदकशक्तेः संभव इति तु न शक्यं। मन्मते परानां नित्यत्वात् अतस्तत्वाज्ञाननिष्ठशक्यातस्यापि तद्वाचकत्वमिति तिमीमांसकमत
विशेष:। न चासौ विचारसहः यतः तन्मते लाक्षणिकस्यानुभावकत्वे दुर्घटमेव पदार्थोपस्थितिद्वारा तथार्थानुभवे शक्त

स्येवलक्ष्यार्थानुभवेत्लाक्षणिकस्यापि हेतुतायां दुर्वारत्वात् तत्रापि शक्तेरवश्यकतया वाचकतापत्तेः पदार्थोपस्थित्याऽन्य
थासिद्धत्वेशक्यस्यापि तथात्वापातात् न चानुभावकतावच्छेदकशक्त्यभावाल्लाक्षणिकस्य नानुभावकत्वसंभव इति वाक्या
र्थघटकार्थान्तरवाचकमेव पदं स्वार्थस्य तदन्वयप्रतियोगिलक्ष्यार्थस्याप्यनुभावकमुपपन्नम् इति वाच्यं। एवं सति गंगायां घो
ष इत्यादौ घोषादिपदस्यापि गंगातीरादिरूपार्थानुभावकतावच्छेदकशक्तिमत्त्वेन तद्वाचकतापत्तेः। लाक्षणिकस्याननुभा
वकत्वे शक्यघटितधूमादित्यादिहेतुवाक्यादन्वयानुपपत्तेः। तत्र धूमादिपदस्य सान्ते विसृक्तेश्वलाप्यनेलाक्षणिकत्वा
त्। अथ लक्ष्यार्थस्य न शाब्दबोधे प्रवेशः। अपि तु स्मृतस्य तस्य समभिव्याहृतपदार्थेऽसंसर्गांशमात्रं। तथा च नानुपप
त्तिः। न च लक्ष्यार्थस्य शाब्दबोधविषयतानुपगमे तदुपरागेणाश्रुणोमीत्यनुव्यवसायानुपपत्तिरिति वाच्यं। इष्टत्वात्। विधेयो
परागेणैव तथा प्रत्ययात् लक्ष्यार्थस्य शाब्दबोधविषयत्वेपि तस्य विधेयतयाभावानभ्युपगमात्। विधीन परः शाब्दार्थ इति
सिद्धांतात्। इति चेन्न तथापि मंचः क्रोशंतीत्यादौ लक्ष्यार्थमंचस्थपुरुषादेः शाब्दबोधविषयताया आवश्यकत्वात् अन्यथा
त्याननुभूतस्य पुरुषादेः प्रतीत्यनिर्वाहात्। अननुभूतस्य स्मरणासंभवात् तमानप्रकारत्वमात्रेण शाब्दबोधपदार्थोपस्थि
त्यादेः कार्यकारणभावमभ्युपगच्छतां मीमांसकानां शाब्दबोधयोग्यतावलेनाऽपूर्वपदार्थभावेन लक्ष्यार्थस्य शाब्दानुभवोपग
मेऽपूर्वस्यापि तस्य प्रतीत्युपपत्तिरिति। तद्विषयकशाब्दत्वावच्छिन्नप्रतिशक्तिविशेषपुरस्कारेण तत्तद्वाचकपदस्मृतज्ञानस

ज्ञानादितु तासंभवः विशिष्य तत्तत्पदार्थान्विततत्तदर्थबोधे तत्पदस्साकांक्षतत्तत्पदज्ञानं विना वश्यक्लृप्तकारणतयैवोपप
त्तेरिहदृशकार्यकारणभावस्य निर्युक्तिकत्वात् इदं तु नत्वं तीरादौ गंगादिपदजन्यबोधविषयतासत्वेपि तद्दशे शुद्धबोधवि
षयत्वेत्वादिनैव तादृशविषयत्वादिप्रकारकत्वमीश्वरेच्छाया अभ्युपगम्यते। न तु गंगापदस्य जन्यबोधविषयत्वत्वादिनापि
तत्प्रकारकत्वमानाभावात् तदनभ्युपगमेपि तस्याः सर्वविषयकत्वाव्याघातात् न च तथा सति वीपांशे गंगापदज
न्यतानवगाहितया सर्वविषयकत्वानुपपत्तिरिति वाच्यं तीरादि विशेष्यतानिरूपितप्रकारतावच्छेदकघटकतया
तदनवगाहित्वेपि बोधांशे स्वातंत्र्येण तदवगाहित्वोपगमात् तथा च तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारता
निरूपितविशेष्यतासंबंधेनेश्वरेच्छावत्वस्य दृष्टानिरूपितविशेष्यतावत्वस्य वास्तुदशक्यतारूपतया नातिप्रसंगः॥
उक्तरीत्यैव च घटादिपदजन्यबोधविषयस्य घटान्वितकर्मत्वानयनादेर्घटादिसंसर्गस्य च तादृशबोधविषयत्वप्र
कारकेश्वरेच्छाविषयत्वेपि घटादिपदानां शक्यत्वमुपनीयं। अन्विताभिधानवादिनस्तु पदार्थसंसर्गस्यापि वाच्यतां स्वी
कुर्वंति। तन्मते इतरान्वितघटो घटपदशक्य इत्येतादृशमेव शक्तिज्ञानं शाब्दबोधप्रयोजकं। घटो घटपदवाच्य इत्या
कारकस्यान्वयांशानंतर्भावेण शक्तिग्रहस्य न तथात्वे वृत्तिग्रहाविषयतया पदार्थसंसर्गस्य शाब्दबोधविषयतानुप

पपत्तेः॥ नन्वेतरान्वितघटस्य वाक्यप्रतिपाद्यतया शाब्दबोधात्मकशक्तिग्रह एव दुर्घटः अनुपस्थितत्वादिति वाच्यं विशेषतः
पदार्थांतरघटिततदन्वितघटादिरूपवाक्यार्थस्य प्रागनुपस्थितावपि इतरपदार्थत्वादिना सामान्यधर्मप्रकारेण तद्घटि
तस्य तदन्वितघटादेः प्रागुपस्थितिसंभवेन तत्र शक्तिग्रहस्य सुघटत्वात् वस्तुतः तत्तत्पदार्थांतरमनंतर्भाव्य केवलान्वयां
शांतर्भावेण शक्तिग्रहस्य शाब्दधीप्रयोजकतोपेयापदार्थांतरस्य पदांतरलभ्यतया तदंशांतर्भावेण शक्तिग्रहस्यानु
पयुक्तत्वात् न चान्वयस्य पदवाच्यत्वे तदंशे शक्तिग्रहस्य शाब्दबोधोपयोगित्वे च मानाभावात् इति वाच्यं। तद्विषयक
शाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिहेतुतायाः सामान्यतएव क्लृप्ततया वृत्तिज्ञानादनुपस्थितौ तस्य शाब्दबोध
विषयत्वासंभवात् अन्वयांशे शक्तिग्रहस्यापि शाब्दबोधे वश्यापेक्षणीयत्वात् संसर्गताभिन्नविषयतायाः शाब्दशो
पस्थितिजन्यतावच्छेदकत्वे गौरवात् अत एव वदंति सामान्यतः तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतदुपस्थितित्वेनन
हेतुता स्वतंत्रवृत्तिज्ञानादिसृष्टंखलभावेनैकपदोपस्थितयोः पदार्थतावच्छेदकयोर्विशेष्यविशेषणभावक्रमेण शा
ब्दबोधापत्तेः किंतु तद्धर्मप्रकारेण तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतद्धर्मावच्छिन्नतद्विषयकोपस्थितित्वेनैव हेतु
ता वाच्या एवं च तत्संसर्गस्य किंचिद्धर्मप्रकारेण तद्विषयकत्वाभावात् वृत्तिज्ञानात् तदुपस्थितावपि तत्संसर्गकः शाब्द

बोधः संभवत्येव एवं तद्विषयकशाब्दबोधे तत्तत्पदज्ञानजन्यतदुपस्थितित्वं लाक्षणिकपदज्ञानजन्यतदुपस्थित्योर्द्व
योरेव हेतुतायाः प्राच्यतया परस्परजन्यबोधे व्यभिचारस्य वारणाय तत्तत्कारणानंतर्यस्य तत्तत्कारणजन्यतावच्छेदके प्र
वेशधौरेयेण पदार्थद्वयसंसर्गावगाहिबोधे वृत्तिज्ञानजन्यतदुपस्थितेर्व्यभिचारप्रसक्तावन्वयस्य पदवाच्यत्वमप्रामा
णिकं न च शक्तिलक्षणयोर्वृत्तित्वेनानुगमसंभवात् तदुभयविषयकज्ञानजन्योपस्थित्योरेकोरूपेणैव हेतुतया नोक्तव्य
भिचारप्रसक्तिरिति वाच्यं उभयसाधारणवृत्तित्वस्यानुगतस्य दुर्वचत्वात् पत्तुशक्तिविषयकज्ञानजन्यतदुपस्थित्वेनैव श
क्तिलक्षणाधीनपदार्थोपस्थित्योरनुगमसंभवः घटशक्तं घटपदमित्येतादृशशक्तिज्ञानजन्योपस्थितेरिव घटसंबंधि
शक्तं घटपदमित्यादिलक्षणाज्ञानजन्योपस्थितेरपि घटादिसंबंधिघटादिनिरूपितशक्तिविषयकज्ञानजन्यत्वादिति
नोक्तव्यभिचारप्रसक्तिरिति न च पटशक्तं पटपदमित्यादिज्ञानजन्यपटाद्युपस्थितेरपि तत्रोद्बोधकांतरात् घटादिमानं
तादृशघटादिविषयकोपस्थितेरपि घटादिशाब्दबोधजनकत्वापत्तिरिति तद्विषयकशाब्दबोधे तदर्थविशेषितशक्ति
विशिष्टपदविषयकज्ञानजन्यतदुपस्थितित्वेन हेतुता वाच्या तथा च नतेन रूपेण घटसंबंधिशक्तं घटपदमित्यादिज्ञा
नजन्यघटाद्युपस्थितेः संग्रह इत्युक्तव्यभिचारो दुर्वार एवेति वाच्यं शक्तिविषयतावच्छिन्नकारणताप्रतियोगिकतद्वि

षयतावच्छिन्नकार्यताशालित्वेनोपस्थितेन शाब्दबोधहेतुया दर्शितोद्बोधकान्तरप्रयोज्यघटादिविषयताकोपस्थितेर्निरू
पककार्यताशालित्वविरहेणोक्तातिप्रसंगानवकाशात् तदर्थविशेषितशक्तिविषयतापर्यन्तस्योपस्थितिनिष्ठकारण
तावच्छेदकेऽनिवेशादननुगमासंभवात् उक्तलक्षणज्ञानहेतुतायामपि शक्तिविषयताया अवच्छेदकप्रवेशादिति न
न्यसमीचीनं उक्तानुगतरूपेण पदार्थोपस्थिते हेतुत्वे घटकालीनायाः शक्तेः तद्घटपदमित्यादिज्ञानजन्यघटा
द्युपस्थितितोऽपि घटादिशाब्दबोधप्रसंगात् तत्कालीनशक्तिरूपपरंपरासंबंधविषयतानां पातिन्यां शक्तिविषयता
याजपितादृशसंबंधप्रयोज्यघटादिविषयताप्रयोजकत्वात् तादृशशक्तिविषयकाधीनोघटादिनिरूपितत्वेन तत्सं
धिनिरूपितत्वोपरागेण चपदशक्त्यावगाहितया शाब्दबोधप्रयोजकतच्छक्तपदज्ञानतल्लाक्षणिकपदज्ञानानाम
कतयातज्जन्योपस्थितेः शाब्दबोधजनकत्वे इष्टापत्त्यसंभवात् न च किंचिन्निरूपितत्वोपरक्तशक्तिविषयताप्रयो
ज्यतत्तदर्थविषयताकोपस्थितित्वेन शाब्दबोधजनकत्वोपगमान्नायमतिप्रसंगः उक्तज्ञानीयशक्तिविषयतायाः
किंचिन्निरूपितत्वविषयतानिरूपितत्वविरहादिति वाच्यं एवमपि घटकालीनायाः पटनिरूपितशक्तेः तद्घटपदमि
त्यादिज्ञानजन्यघटाद्युपस्थितिरव्याहतेः अथ किंचिन्निरूपितत्वविषयतानिरूपितत्वेन शक्तिविषयताया दृशका

रणतावच्छेदिकानादृश्यकारणताप्रतियोगिकप्रकृतार्थविषयतावच्छिन्नकार्यताशालित्वेन पदार्थोपस्थिते हेतुत्वोपगमा
न्नापमतिप्रसंगः। अथ जन्यशेषे उदासीनस्य पदनिरूपितत्वादेर्भानेपि घटकालीनशक्तिरूपघटीयपरस्परासंबंधविषय
कपदज्ञानस्य घटादिस्मारकतया स्मृतिजनकतापत्त्यादिनिरूपितत्वविषयतानिरूपितत्वस्य शक्तिविषयकत्वेऽ
निवेशादिति चेत् एवं सति घटपदेः शक्तत्वसंबंधेन पदार्थप्रकारतानज्ञानोपस्थितिः तोपि घटपदेः शाब्दबोधोन्म
त्तानदनुपपत्तिर्ईश्वरीयवृत्तपदांशेऽजर्थसंसर्गतया शक्तिभानेश्वरावर्थस्य निरूपितत्वरूपसंबंधांतराभावात् वस्तु
तो घटत्वाद्युपलक्षितवाचकत्वानुभवादिपदार्थत्वापत्तेर्भानस्य घटत्वादिप्रकारकशाब्दबोधवारणाय तद्धर्मप्रकारकशाब्द
बोधे शक्तो तद्धर्मविशिष्टनिरूपितत्वावगाहित्वेन शक्तिज्ञानस्योपयोगितावाच्या तथा च मतसंबंधिशक्तत्वावगाहितोल्ले
खनाग्रहस्य तेन रूपेणासंग्रहादननुगमेन व्यभिचारप्रसक्त्याक्कार्यकारणभावे कारणतानंतर्यनिवेशावश्यकत्वे एवं श
क्तिज्ञानमुभयविधं विनिगमकाभावाच्छाब्दबोधप्रयोजकं पदेऽर्थवाचकत्वावगाही अर्थे पदवाच्यत्वावगाही च तयोरपि
नानुगमसंभवः। वाच्यत्ववाचकत्वयोः शक्तिप्रतियोगित्वशक्त्याश्रयत्वरूपमिथोविलक्षणसंबंधरूपतयाऽननुगतान
तिप्रसक्तरूपाभावात् संबंधत्वादिनानुगमे तदीयकालिकादिसंबंधज्ञानादर्थधर्मिकपदवाचकतापत्तिः पदधर्मिका

वाच्यताद्याश्रयज्ञानाच्छाब्दबोधापत्तेः॥ न तज्जन्योपस्थितयोरपि परस्परजन्यबोधेऽव्यभिचारः एवं लक्षणाज्ञानमपि पदेऽर्थ
संबंधिवाचकतावगाहितयाऽर्थे पदवाच्यत्वसंबंधितावगाहितया च विधं शाब्दबोधप्रयोजकं न तद्धीनोपस्थितयोरपि
जनतिप्रसक्तरूपेणानुगमासंभवेन परस्परजन्यशाब्दबोधेऽव्यभिचार इति कार्यतावच्छेदकगर्भे तत्तत्कारणानंतर्यप्र
वेशाच्च वइत्यस्य वधेयां अथ वृत्त्यनुपस्थितस्यापि पदार्थद्वयसंसर्गस्य शाब्दधीविषयत्वोपगमे संबंधभाने नियामकाभावा
त्सर्वत्राबाधितयावत्संबंधभानापत्तिरिति चेन्न कयोश्चित्पदयोः केनचित्संबंधेन स्वार्थान्वयबोध एव साकांक्षतयाऽऽका
ंक्षाज्ञानस्यैव पदार्थसंसर्गभाने नियामकत्वात् यथा घटपदयोः नानासंबंधेन स्वार्थान्वयबोधे आकांक्षा तज्जन्य
शाब्दबोधे संसर्गविशेषताव्यर्थज्ञानरूपकारणबलादेव संबंधभाननियमोपपत्तेः न च संसर्गविशेषानुपस्थितौ
तात्पर्यज्ञानासंभवेन तदुपस्थितेरावश्यकतया तस्यां च संस्कारोद्बोधार्थमेव तत्र वृत्तिज्ञानमपेक्षितमिति वाच्यं
उद्बोधकांतरैरुपस्थितेऽपि संसर्गे तात्पर्यग्रहसंभवात् तत्र वृत्तिज्ञानस्यानपेक्षितत्वात् तस्माद्घटत्वगोत्वविशिष्टए
घटगवादिपदस्य शक्तिः पदार्थद्वयसंसर्गस्तु आकांक्षादिवशलभ्य एवेतीण्यहरिदासास्तु तत्पदबोध्यत्वप्रका
रतानिरूपितविशेष्यतासंबंधेन भगवदिच्छावत्त्वमेव तत्पदवाच्यत्वं गंगादिपदजन्यबोधविषयत्वप्रकारतानिरूपित

विशेष्यतायामुख्यार्थप्रवाहादावीश्वरेच्छासंबंधत्वनतीरादावितिनतीरादेर्गंगापदवाच्यतापत्तिः।नचतीरादीनतत्संबंध
त्वामित्यस्यनतीराद्यनुयोगिकसंबंधत्वमित्यर्थः।सचनसंगच्छतेनादृश्यविशेष्यतायास्तीरादावपिसत्वात्तीराद्यनुयोगि
कस्येश्वरेच्छाप्रतियोगिकत्वस्यचतत्रासत्वादितिवाच्यंतीरादीनांतत्संबंधत्वमित्यस्यनतीराद्यनुयोगिकत्वावच्छेदेनत
त्प्रतियोगिकत्वमित्यर्थकतयानुपपत्तिविरहात्तथाहिसमवायेष्यमतेएकस्मिन्नेवरूपप्रतियोगिकत्वतदाद्यनुयोगि
कत्वोभयसत्वेपितन्निष्ठसामानाधिकरण्यमात्रेणनत्ववच्छेद्यावच्छेदकभावाख्यसंबंधइतिनघटादेरूपादिमत्वंतथाच
गगनादावन्वयबोधविषयत्वप्रकारतानिरूपितविशेष्यतायाईश्वरेच्छाप्रतियोगिकत्वतीराद्यनुयोगिकत्वोभयवत्वेपिनतयो
रवच्छेद्यावच्छेदकभावइतिनतीरादेर्गंगादिपदवाच्यत्वंकेचित्तुअवच्छेद्यावच्छेदकभावानंगीकारेपिवायुःरूपगतिस्तात
त्संबंधमत्वंरूपसमवायसत्वेपिरूपात्मकसंबंधसत्वात्तत्रापिनातादृशविशेष्यतासत्वेघटपदादेःपदार्थभावेनाप
त्यभावात्तादृशसंबंधेनपटपदवत्वमेवपटपदवाच्यत्वमित्याशयस्तेषांघटादिपदानांपदार्थतावच्छेदकीभूतघ
टत्वादिविशिष्टएवशक्तिः।ननुघटत्वाद्युपलक्षितेतस्यद्रव्यत्वाद्यविशेषेणघटादिपदात्द्रव्यत्वादिनानबोधः।अपितुघ
टत्वादिनैवेतिनियमानुपपत्तेः।अथघटत्वादेरिवद्रव्यत्वादेरपिवैशिष्ट्यसत्वघटपदेसत्वाद्घटादिपदशक्तेर्घटत्वादिसामा

नाधिकरण्यरूपवैशिष्ट्यवद्द्रव्यत्वादिवैशिष्ट्यस्याप्यसत्तया घटत्वविशिष्टे शक्तिः, न तु द्रव्यत्वविशिष्टे इत्यस्य कोऽर्थः। अत एव वदन्ति :- त
द्विशिष्टे शक्तिरित्यस्य न तद्धर्मतद्वैशिष्ट्ययत्तदाश्रयेषु निष्ठत्वं शक्तिरित्यर्थः; घटादिपदशक्तिमति द्रव्यत्वादिवैशिष्ट्यस्य सत्त्वेऽपि द्रव्य
त्वादौ न च शक्तिविरहात् तेषामुपलक्षणता। घटत्वादौ तु सत्त्वात् तेषां विशेषणता। एवं च प्रवृत्तिनिमित्तेऽपि शक्तिस्तस्यापि वाच्य
तया वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वमिति प्रवृत्तिनिमित्तलक्षणे वाच्यत्वे सतीति विशेषणदानमुपपद्यते
अथ घटशब्दाद्घटो बोद्धव्य इत्याकारिकायाभगवदिच्छाया बोधविशेषविषयतावत्त्वेन विषयता घटस्यैव न तु घटत्वादौ विषयता मा
त्रे च वस्तुमात्र एवेति कथं घटपदस्य शक्तिर्घटत्वादिनिष्ठेति चेदीश्वरेच्छाया अस्मात्पदाज्जन्यः शाब्दबोधविषयताप्रयोजकसंबंध
एव तत्र तत्पदशक्तिरिति व्यप   देशनियामकः घटपदाद्घटो बोद्धव्य इत्येतादृशेच्छायां च घटत्वावच्छेदेन बोधविषयत्वमवगाह
मानायां समवायावच्छिन्नबोद्धविषयतावच्छेदकत्वं घटत्वे समवायेन घटत्वाद्यवच्छेद्यत्वं वा विषयतायां संसर्गमर्यादया भासते एवं
चाश्रयत्वसंबंधावच्छिन्नबोधविषयत्व   प्रकारतानिरूपितविशेष्यत्वं घटस्यावच्छेदकतासंसर्गावच्छिन्ना घटविशेषणतापन्नबो
धविषयत्वस्य या प्रकारता तन्निरूपितविशेष्यत्वं घटविशेषणतापन्नबोधविषयत्वांशेऽवच्छेद्यत्वसंबंधेन प्रकारत्वं वा घटत्वस्य
घटत्वबोधविषयत्वयोः संसर्गविधया भासमानेऽवच्छेदकत्वेऽवच्छेदकतया भासमानत्वं समवायस्येति त्रितयमेव घटपदजन्य

वंचसतिशक्तिज्ञानाधुनिकसंकेतज्ञानयोरेकरूपेणोवहेवत्वात् यत्रद्रव्यपदाद्गुणवत्वादिनाद्रव्यंचोद्बुध्यमित्याकार
कस्याधुनिकसंकेतस्याविषयतात्द्रव्यत्वाद्यवच्छिन्नपदहीतातत्रतत्रतादृशसंकेतग्रहाद्द्रव्यत्वेनद्रव्यबोधापत्तेःगुण
वत्वावच्छिन्नेतस्याग्रहादनंतपुरुषीयगुणवत्वादिप्रकारकबोधानुपपत्तेर्दुर्वारत्वात्। अथपदार्थांशेइवप्रकारीभूतध
र्मांशेपिवाच्यत्वग्रहस्यापेक्षितत्वेआकाशपदाच्छब्दाश्रयतयाबोधोनस्यात्शब्दाश्रयत्वस्याकाशपदावाच्यतायाः
सिद्धांतसिद्धत्वात् तत्कारणायप्रवृत्तिनिमित्तलक्षणेवाच्यत्वेसतीतिविशेषणोपादानमितिचेन्नशब्दाश्रयत्वस्याका
शपदवाच्यत्वमनंगीकर्तृभिःप्राचीनैराकाशपदाद्याकांशांशेतदुपस्थाप्यप्रकारकशाब्दबुद्धेरेवोपरमात् तदुक्तं
अस्तुवापदादपिनिर्विकल्पकमितिनिर्विकल्पकंचतदंशेतत्पदोपस्थाप्याप्रकारकत्वंनतुतदंशसामान्यतोनिष्प्रका
रकत्वंविभक्त्युपस्थाप्यैकत्वादीनांतदंशेप्रकारतायाआवश्यकत्वात्तेनसमंपदार्थांतरस्यसंसर्गानवगाहनेतादृशबो
धस्यशाब्दत्वासंभवात् वस्तुतस्तु अत्रनिर्विकल्पकपदंतत्पदोपस्थाप्यवस्तुविशेषितधर्मिविषयकशाब्दानुभवजनकनि
र्विकल्पकस्मरणपरं अतएवतत्रनिर्विकल्पकरूपस्यस्मरणस्यानुपपत्तिअनुभवस्यस्वसमानप्रकारकस्मृतिजनक
त्वादित्याशंक्यप्रकारांतरेणतादृशस्मरणमुपपादितंमिश्रैः अत्रचमतेज्ञात्यतिरिक्तस्यतस्यस्वरूपतःपदार्थांतरेप्रकारत्वा

संभवादाकाशवासीत्यादौ शाब्दबोधानुपपत्तिः अन्वयिनावच्छेदकावच्छिन्न एव पदार्थान्तरान्वय इति नियमानुपपत्तिश्चेति शब्दा
श्रयत्वस्याप्याकाशपदवाच्यत्वमावश्यकमित्यभिप्रेत्यैव दीधितिकृता गुणटिप्पण्यां रूपग्रंथे श्रोत्रेदं तत्त्वमित्यादिना गोत्वादिना
शब्दाश्रयत्वस्याविशेषंण्युमाघ्यप्रकाशस्य प्रवृत्तिनिमित्तलक्षणे वाच्यत्वविशेषणस्यापादानं दूषितमेव यत्तु शक्त्याकाश
पदादष्टद्रव्यातिरिक्तद्रव्यत्वादिनाप्याकाशबोधो भवति न तु नियमतः शब्दाश्रयत्वेनैव तथा सति चाकाशः शब्दाश्रय
इति सहप्रयोगस्य मुख्यत्वानुपपत्तेः प्रत्येकं नानाधर्मविशिष्ट एवाकाशे तत्पदस्य नानाशक्तिकल्पनं न संभवति नाना
धर्मावच्छिन्नैकधर्मिणि एकपदवाच्यतायाः क्वाप्यदृष्टत्वादिति शब्दाश्रयत्वोपलक्षित एवाकाशपदशक्तिरित्येवमुपगंत
व्यउपलक्षणस्यापि विशिष्टावाचकपदजन्यशाब्दबोधप्रकारत्वेन न किंचिद्बाधकं नन्व शब्दाश्रयत्वस्योपलक्षणत्वे तस्य
वाविशेषात् प्रमेयत्वादेरप्याकाशपदजन्यानुभवप्रकारतापत्तिरिति वाच्यं तत्प्रकारकशाब्दबोधे तादृशेनतिप्रसक्त
त्वरूपशक्यतावच्छेदकत्वावगाहित्वेनोपलक्षितशक्तिज्ञानस्य हेतुत्वादिदं शब्दाश्रय इति प्रयोगस्य मुख्यत्वासिद्ध्याष्टद्र
व्यातिरिक्तद्रव्यत्वेनाकाशपदवाच्यत्वावच्छेदकत्वरूपेण लक्षणाया एव तत्रोपगमादिति यदि चाकाशः शब्दाश्रय इत्यादिवा
क्यस्थाकाशादिपदं मुख्यमेव॥ निरूढलक्षणावच्छेदकश्च नान्वयबोधः कुत्रापि॥ तदाकाशादिपदाद्यत्याऽष्टद्रव्याति

रिक्तद्रूपत्वादिनायोधनिर्वाहाय विशिष्टवाचकाकाशादिपदस्य प्रकारांशे वाच्यत्वानवगाहिशक्तिग्रहस्यैव तत्तद्धर्मावच्छि
न्नविशेष्यकस्य तत्तद्धर्मप्रकारान्वयबोधहेतुत्वमगत्यास्वीकार्यं॥ विशिष्टवाचकगवादिपदस्य प्रकारांशे वाच्यत्वावगा
हिशक्तिज्ञानमेव तत्तत्प्रकारकशाब्दबोधहेतुरिति न शक्तिभ्रमलक्षणाग्रहाद्यंतरेण गवादिपदाद्घटपदवाच्यत्वा
पवाच्यधर्मप्रकारकोबोधः॥ आकाशादिपदमिव गवादिपदमपि विशिष्टवाचकमिति भ्रमवशतो गवादिप
दाद्वाच्यधर्मप्रकारकबोधनिर्वाहाय तत्तद्धर्मप्रकारकशाब्दबोधेन तद्धर्मसामानाधिकरण्यमात्रावगाहितत
त्पदवाच्यताग्रहस्य हेतुत्वेपि तद्धेतुतापां वाच्यतांशे विशेषणानंतर्भावितावगाहित्वमथवच्छेदकमुपेयं॥ अतो
ऽवाच्यधर्मप्रकारकबोधहेतुगवादिपदशक्तिग्रहस्य भ्रमत्वनियमः॥ अतो नान्यांतस्य तत्र स्वादृशबोधइति
ध्येयं॥ एवंच स्कवर्णवहनयोग्यगवादिविशेषपरे सामान्यवाचकपदघटितं द्रूपं नास्ति गौ नास्तीत्यादिवाक्य
प्रयुज्यते तत्र विशेषधर्मावच्छिन्नलक्षणैव विशेषधर्मस्य सामान्यशब्दावाच्यतया शक्यात्तद्रूपप्रकारकबोधा
निर्वाहात् एवं यत्रदुःखासंभिन्नस्कस्वत्वधानकर्म्मगोत्वादिविशिष्टवाचकस्वर्गधेन्वादिपदं केवलस्कस्वत्वगोत्वा
द्यवच्छिन्ने तात्पर्यात् प्रयुज्यते तत्र लक्षणैव शक्यप्रवृत्तिनिमित्तैकदेशं परित्यज्य नबोधइत्यनुभवनिर्वाहायस्तु

दुग्धकर्म्मप्रकारकशाब्दबोधे तद्धन्यरूपावच्छिन्नत्वानवच्छिन्नबोधविशेषविषयत्वीयप्रकारतात्वेन प्रकारताघटित
संबंधावगाहित्वशक्तिस्तानस्य कारणत्वमुपगंतव्यं विशेष्यतावच्छेदकतापर्य्याप्त्यवगाहित्वानत्वेन हेतुत्वान्नातिप्रसंग
इति तु कानुपपत्त्याद्येयं प्राभाकरास्तु धेनुपदस्य धानकर्म्मताविशिष्टगवशक्तिर्न्नतु गोत्वमपि विशेषणं त्वस्य शक्युपा
धित्वेन शक्तिनियंत्रकत्वात् धानकर्म्मत्वस्य महिष्यादिसाधारणत्वेपि न धेनुपदान्नद्बोधः न च धेनुपदाद्गोत्वप्रकारक
बोधस्यानुभविकतया धानकर्म्ममहिष्यादिमति देशे धेनुर्न्नास्तीति विशेषदर्शिनां प्रयोगस्य सत्त्वान्न प्राच्यधेनुप
दजन्यबोधे गोत्वभानमवश्यमंगीकरणीयं तथा च धानकर्म्मत्वइव गोत्वेपि शक्तेरावश्यकताग्रशक्यस्यापि प्र
कारतया शाब्दबोधे भानोपगमे लघुत्वप्रमेयत्वादेरपि प्रकारतया शाब्दबुद्धौ भानापत्तेरिति वाच्यं अशक्यस्य भा
ने शक्यतावच्छेदकस्वस्य नियामकत्वात् गोत्वस्य चाशक्यत्वेपि शक्यतापामवच्छेदकतात्मकसंबंधविशेषोपग
मात् लघुत्वादिभ्यस्तथात्वेनातिप्रसंगविरहात् न च गोत्वस्य वृषभादिसाधारण्यात् अतिप्रसक्ततया शक्तौ नावच्छेद
कतासंभव इति वाच्यं अवच्छेदकत्वस्य प्रकृते ऽनतिप्रसक्तत्वानियतत्वात् नियतत्वे वा धानकर्म्मत्वसहितस्यैव
तस्यावच्छेदकत्वोपगमात् अन्यगोत्वमेव शक्यं धानकर्म्मत्वमेव शक्यत्वोपाधिरिति वैपरीत्यमेव कुतो न स्यात् वस्तु

नोधानकर्मतापेक्षयालाघवेन गोत्वस्य शक्यत्वमुचितं न च गोत्वमतिप्रसक्तं धानकर्मत्वं च धानव्यक्तिभेदेन भिन्नमि
ति गोनिष्ठं तदनतिप्रसक्तमिति वैपरीत्यमिति वाच्यं न स्यातिप्रसक्तत्वेपि शक्यत्वोपगमे सति विरहात् वृषभादिबोधस्य
शक्युपाधिधानकर्मत्वस्यापि प्रकारतयावारणात् न च गोत्वस्य शक्यत्वे जातिशक्तिपक्षे व्यक्तिलाभसंभवेनान्यलभ्य
त्वपागवादिपदस्य न व्यक्तिशक्त्युपचेलस्र्संगः तथा च धानकर्मत्वस्य शक्यतावच्छेदकत्वानुपपत्त्या वृषभादिबोधोद्
वार एवेति वाच्यम् एतदनुरोधेनापि व्यक्तौ शक्तिस्वीकारादिति चेन्न यद्धर्मविशिष्टे शक्तिः तद्धर्माश्रयस्यापावतए
वशक्यत्वनियमेन गोत्वविशिष्टस्य शक्यत्वे च वृषभादेरपि तथात्वापत्तेः धानकर्मत्वविशिष्टगोः शक्यत्वे च गो
निष्ठधानकर्मताव्यक्तीनामेव विशेषणतया शक्यतानानात्वम् इष्यादिव्यावृत्तानताम् इष्यादेः शक्यतापत्तिवि
रहादिति वदन्ति तन्न तेपक्षेपि शक्तिज्ञानशक्तिज्ञानाधुनिकसंकेतत्वानपेः कारणताभेदेन गोत्वेन बाधकं भ
गवद्धिद्वेषिणां मीमांसकानां शक्तिः संकेतानात्मकतया तत्परिकककारणतया कथमप्यसंभवात् तथापि गोनि
ष्ठधानकर्मताव्यक्तीनां अननतिप्रसक्तानुगमकरूपाभावान्न शक्यत्वसंभवः न च सामानाधिकरण्येन गोत्वमेव
धानकर्मकत्वत्वसहितं धानकर्मताविशेषाणामनुगमकमिति वाच्यम् अशक्येन शक्यानुगमे सर्वत्रैव विशेष

गेशक्युक्तेरप्रसंगात् अतिप्रसक्तेनापिधानकर्म्मतात्वेन विशिष्टधानकर्म्मताविशेषे शक्तिग्रहोपगमे गोत्वविशि
ष्टएव गोविशेषे शक्तिर्धानकर्म्मत्वमेव शक्युपाधिरित्येव वक्तुमुचितं अननुगमेन तत्तद्धानकर्म्मतात्वेन शक्ति
ग्रहोपगमे चापूर्वव्यक्त्यलाभप्रसंगात् शक्यत्वानुपपत्तिश्चेत्याप यथा नानाधर्म्मविशिष्टैकधर्मिवाचकपदानां श
क्तिप्रमातो नैकधर्म्मं परित्यज्यापरधर्म्मः प्रतीयते तथा चंद्रत्वसूर्य्यत्वनानाधर्मविशिष्टनानाधर्मिवाचकपुष्प
वंतादिपदाच्चंद्रत्वादिकं परित्यज्य सूर्यत्वादिप्रकारकोबोधः अथ हरिपदशक्तिज्ञानादिवार्कः पुष्पवंतपदत्वा
च्छिन्नत्वाकारकशक्तिज्ञानात्केवलसूर्य्यत्वादिप्रकारकबोधो दुर्वारः न च पुष्पवंतादिपदशक्तिज्ञाने न सूर्य्यत्वादि
प्रकारकशाब्दबोधजनने चंद्रत्वादिप्रकारकशक्तिज्ञानादेरपि सहकारितोपगमात्रादिप्रसंगः इति वाच्यं हर
ष्यादिपदवन्नानार्थताग्रहदशायां श्रांतस्य केवलसूर्य्यत्वादिप्रकारकंग्रहस्यापि उत्पत्तेः एवं तत्पदस्य हर्य्यादिपे
दवन्नानार्थताप्रसंगोपि दुर्वारः न चार्थद्वयेतस्यएकस्याएवशक्तेरुपगमान्न नानार्थता नानाशक्तिमत एव नाना
र्थत्यादिति वाच्यं शक्यतावच्छेदकभेदेन शक्तिभेदस्याप्यावश्यकत्वात् अवच्छेदकभेदस्यावच्छेद्यभेदनियतत्वात्
अन्यथा हर्य्यादिपदेष्वपि शक्त्यैक्यापत्तेः अत्र शक्यापूर्व पदार्थसंबंधांतरवादिमीमांसकानुपायिनः यथा

ख्या

धानकर्मत्वगोत्वादिरूपशक्यतावच्छेदकभेदेपिघित्वादिपदानांनशक्तिभेदः अवच्छेदकतायाव्यासज्यवृत्ति
त्वात् तथात्रापि चंद्रत्वसूर्यत्वयोर्व्यासज्यवृत्तिशक्यतावच्छेदकतास्वीकारान्नशक्तिभेदः नवाएकंपरित्यज्या
न्यप्रतीतिः केवलसूर्यत्वादिप्रकारकबोधे केवलतद्धर्मशक्यतावच्छेदकतायपर्याप्त्यवगाहिज्ञानस्यहेतुत्वात्
चंद्रत्वसूर्यत्वोभयपर्याप्तशक्यतावच्छेदकतापर्याप्त्यवगाहिज्ञानस्यचउभयप्रकारकबुद्धित्वंकार्यतावच्छेदकं अ
तस्तादृशशक्तिज्ञानाच्चंद्रत्वावच्छिन्नान्वयबोधोपिकयोग्यताज्ञानाद्युसत्वेनसूर्यत्वावच्छिन्नान्वयबोधप्रसं
गः नानार्थपदाच्चप्रत्येकधर्मावच्छिन्नस्यापिप्रतीत्याप्रत्येकएवावच्छेदकत्वपर्याप्तेरवश्योपगंतव्यतयाश
क्यतावच्छेदकभेदेनशक्तिभेदः अथावच्छेदकताग्राहकमानेनएकधर्मिनिष्ठैकविशेष्यतानिरूपितविशेष
णतापन्नेष्वेवनानाधर्मेष्ववच्छेदकत्वपर्याप्तिर्गृह्यते अतो महानसीयोनास्तिवन्हिर्नास्तीत्याकारकं महानसी
यत्वादिवन्हित्वादिविशेषणपुरस्कारेणपृथकप्रतियोगिविषयकंज्ञानंमहानसीयत्ववन्हित्वादिपर्याप्तप्र
तियोगितावच्छेदकताकंविशेषाभावंनावगाहतेअपितुशुद्धवन्हित्वाद्यवच्छिन्नाभावमेवेतिकथं दिवाकरनि
शाकरशशांकपुष्पवंतपदंद्व्यादिशक्तिग्रहेचंद्रत्वसूर्यत्वोभयस्मिन्नशक्यतावच्छेदकतापर्याप्तिमभानं

नत्र धर्मिणोश्चंद्रत्वसूर्यत्वयोर्भेदेन तत्तन्निष्ठविशेष्यतायामैक्यो न समूहालंबनविलक्षणायामुभयत्वादिधर्मिताव
च्छेदकतयाभासमानघटत्वादिषु तादृशाभावप्रतियोगितावच्छेदकत्वपर्य्याप्तिभानं एवं च दिवाकरनिशाकरयोः
शशकमेतत्पदमित्याकारकग्रहे शशविषयतायामैक्ये न समूहालंबनविलक्षणेनोभयत्वधर्मितावच्छेदकतापन्नच
न्द्रत्वसूर्यत्वयोरपि शक्यतावच्छेदकतापर्य्याप्तिभानेऽविरुद्धमिति न दोषः न चैवमुभयाभावप्रतियोगितायामुभय
त्वस्येव प्रकृते उभयत्वस्येव प्रकृते उभयत्वस्याप्यवच्छेदककोटिप्रवेश इति वाच्यं अभावबुद्धौ प्रतियोग्यंशे उपल
क्षणस्याप्रकारत्वनियमादुभयत्वस्य प्रतियोगितावच्छेदकत्वधीर्न्यात शक्तिग्रहे च शक्यांशे उपलक्षणस्य दुभयत्व
स्य प्रकारत्वाभावे न तस्य शक्यतावच्छेदकत्वात् अस्तु वा प्रकृते उभयत्वसाहित्यमेव चन्द्रत्वसूर्यत्वोभयं शक्यता
वच्छेदकं द्वावित्यत्रैव पुष्पवंतावित्यत्रापि प्रकृतिविभक्तिभ्यामुपस्थापितस्य द्वित्वस्य सकृदेव भानं विरुद्धयोरेकाव
च्छेदकत्वपर्य्याप्तिरपि घटत्वपटत्वाद्योरुभयाभावप्रतियोगितावच्छेदकत्वपर्य्याप्तिवत् प्रकृते न विरुद्धा तो नच
घटपटौ न स्त इत्यत्र उभयत्व एव प्रतियोगितावच्छेदकत्वं भासते न तु विरुद्धघटत्वपटत्वादाविति वाच्यं केवलोभ
यत्वे तादृशाभावप्रतियोगितावच्छेदकतायाऽपर्य्याप्तेः कथमन्यथा यत्किंचिदुभयवति तादृशाभावप्रतीत्युप

पत्तेः। न च सामानाधिकरण्यसंबंधेन पटत्वपटत्वरूपावच्छेदकतावच्छेदकधर्मेण व्यावृत्तस्योभयत्वविशेषस्यैव तत्रा
वच्छेदकत्वं प्रतीयत इति वाच्यं तेन तेन प्रकारेण तत्रोभयत्वस्याभावात् तत्तद्रूपाणां धर्मिविशेषणतयैव भानात् उभ
ति प्रसक्तधर्मपुरस्कारेणाभासमाने चावच्छेदकतापर्याप्तिभानानुपगमात् तत्रोभयत्वविशेषेभावप्रतियोगितावच्छेद
कतापर्याप्त्यभ्युपगमे चाप्युभयत्वविशेष एव शक्यतावच्छेदकतापर्याप्तिसंभवाच्चंद्रत्वसूर्यत्वयोरवच्छेदकताव
च्छेदकतये वृथा शाब्दबोधोपपत्तेः। न च शक्यतावच्छेदकतावच्छेदकं अवच्छेदकविशेषणतयैव भासत इति चंद्रत्वसू
र्यत्वयोस्तथात्वे चंद्रसूर्यांशे प्रकारतायाः शाब्दबोधभानानुपपत्तिरिति वाच्यं तयोरवच्छेदकतावच्छेदकत्वेपि शक्ति
ग्रहेऽवच्छेदकाश्रयचंद्रसूर्यविशेषणतयैव भानाच्छाब्दबोधेपि तद्विशेषणतयाभानसंभवात् शक्तिग्रहे साक्षाच्छ
क्यतानवच्छेदकस्य तदुभयस्य शक्यचंद्रसूर्योभयांशे साक्षात्प्रकारतयाभानं न संभवतीति चेत् घटपटौ न स्त इ
त्यादौ घटत्वपटत्वयोः साक्षात्प्रतियोगितावच्छेदकत्वं मंतरेण प्रतियोगिनि विशेषणतयाभानासंभवात् तत्रस्य एव
न्यथा वृद्धिलांतर्भावेण पुष्पवंतपदशक्तौ विभक्त्युपस्थापितद्वित्वान्वय इति चेदेवमेव द्वाविति वद्द्विवचनस्य सा
धुत्वार्थकत्वोपगमादित्याहुः। ज्ञानशक्तिवादिनस्तु। चंद्रत्वसूर्यत्वोभयप्रकारकज्ञानमेव पुष्पवंतपदशक्यमुभ

यप्रकारकज्ञानंशार्कंइत्याकारकशक्तिग्रहस्यतादृशज्ञानत्वमेवकार्यतावच्छेदकमितितादृशव्युत्पत्तिमतोनैकैक
बोधापत्तिरतादृशस्यचभवत्येवतादृशबोधः नचैवमपिचंद्रत्वप्रकारकज्ञानेशार्कंइत्यादिबोधस्यप्रमात्वात् शक्ति
भ्रमंविनामस्येकबोधानुपपत्तिःकथमुपपद्यतइतिवाच्यंकेवलचंद्रत्वादिप्रकारकबोधेतत्प्रकारकबोधत्वांशे
शक्तिनिरूपकतावच्छेदकत्वपर्याप्तिग्रहस्यहेतुत्वात्प्रकृतेतुउभयप्रकारकबोधत्वांशेशक्तिनिरूपकतावच्छेद
कत्वपर्याप्त्यस्यभ्युपगमात् तादृशस्यचंद्रत्वप्रकारकज्ञानेशार्कमित्यादिज्ञानस्यभ्रमत्वनियमात् इत्याहुः वस्तुत
स्तुपुष्पवंतपदाच्चंद्रत्वावच्छिन्नविषयकसूर्यत्वावच्छिन्नविषयकबोधोभवत्वित्याकारकएवतादृशपदेभगवतः
केवलचंद्रत्वावच्छिन्नविषयकबोधश्चानतत्पदश्चजन्यत्वेनतद्विषयकइतितादृशपदान्नतथाविधबोधः नचता
दृशपदजन्यत्वेनकेवलचंद्रत्वावच्छिन्नविषयकबोधस्यसंकेताविषयत्वेपिचंद्रत्वावच्छिन्नबोधविषयकत्वेनसंके
तग्रहस्यचंद्रत्वादिप्रकारकबोधजनकस्यसूर्यत्वाद्यवच्छिन्नविषयकबोधविषयकत्वेनसंकेतग्रहादिघटित
सूर्यत्वावच्छिन्नबोधसामान्याभावस्यामपिसत्त्वेनतद्बलादस्यांतस्यकेवलचंद्रत्वावच्छिन्नविषयकबोधोदुर्वारए
वेतिवाच्यंतत्पदजन्यकेवलचंद्रत्वादिप्रकारकबोधेतत्पदजन्यकेवलचंद्रत्वावच्छिन्नविषयबोधत्वपर्याप्तिवि

षयतावच्छेदकताकत्वप्रकारकसंकेतविषयकज्ञानस्यहेतुत्वात्पुष्पवंतपदजन्यबोधघटितभगवत्संकेतविषयता
वच्छेदकताशरीरेच्चसूर्यत्वावच्छिन्नविषयकत्वचंद्रत्वावच्छिन्नविषयकत्वयोयोरेकत्वनिवेशात्तत्पदजन्यप्रत्ये
कधर्मावच्छिन्नविषयकबोधत्वेविषयतावच्छेदकत्वपर्याप्तिविरहात्तद्दशेतत्पर्याप्त्यवगाहिग्रहोभ्रमएवेतिन
शक्तिप्रमातःप्रत्येकधर्मप्रकारकबोधापत्तिः;तत्पदजन्यचंद्रत्वावच्छिन्नविषयकसूर्यत्वावच्छिन्नविषयकबोध
त्वपर्याप्तविषयतावच्छेदकताकत्वप्रकारकसंकेतग्रहस्यचोभयधर्मप्रकारकबुद्धित्वमेवकार्यतावच्छेदकमतो
नतद्घटितसामग्रीबलादेकधर्मावच्छिन्नाचयबोधस्यापिकिंचित्कारणविरहदशायांअपरधर्मप्रकारकशाब्द
बोधापत्तिः;उभयविषयकत्वावच्छिन्नायाबोधनिष्ठसंकेतविषयतायाएक्यात्तदंशेऐक्यमितिनतत्पदस्यनानार्थत
त्वसंकेतशक्तिपक्षेरमणीयःसमाधिः;एकयोक्त्यापुष्पवंतौदिवाकरनिशाकरौइत्यमरकोशोक्तिपदेशक्तिपरंपु
ष्पवंतपदंपुष्पवंतपदप्रतिपाद्यपरंतथाचसूर्यचंद्रमसोएकशक्त्यापुष्पवंतपदप्रतिपाद्यावित्यर्थलब्धेरुद्देश्यतावच्छे
दकावच्छेदेनविधेयान्वयेतात्पर्याच्चंद्रत्वसूर्यत्वयोरेकशक्त्यधीनप्रतिपत्तिविषयतावच्छेदकत्वलाभः;तेननाना
र्थस्थलेवत्तत्तदंशेएकधर्ममात्रप्रकारकोबोधःनानार्थशक्तिभेदेनविशेषादितिलभ्यतेऽथवाएकयोक्त्याएकोच्चा

रणेनचंद्रसूर्ययोःपुष्पवंतप्रतिपाद्योहीत्यर्थःतथाचनानार्थस्थलेयथानावृत्तिमंतरेणनानार्थबोधःतथानप्रकृतेकु
प्तशक्तेरैक्येनसकृदुच्चरितात्सकृदर्थप्रत्ययएवैकस्याविषयत्वादितिभावःपुष्पवंतपदवत्सर्वनामपदानामपिश
क्तेरैक्यान्ननानार्थताअथसर्वनामपदेनविशिष्यघटत्वपटत्वादिनैववक्तृबुद्धिस्थाघटपटादयःप्रत्याय्यंतेनतु
बुद्धिस्थत्वेनात्रघटोस्तितमानयइत्यादिवाक्यअघटकर्मकानयनादिबोधानंतरंविशिष्टानयनंघटकर्मकंत्व
वेतिसंशयानुत्पादस्यसर्वानुभवसिद्धतयाउपपन्नत्वात्तथाचवक्तृबुद्धिस्थत्वेनसर्वनामपदशक्यतावच्छे
दकंअपितुघटत्वपटत्वाद्येवतादृशनानाधर्मावच्छिन्नेषुपुष्पवंतादिवन्नैकशक्तिसंभवःएकैकधर्ममात्रप्रकारक
तद्बोधानुपपत्तेरितिसर्वनाम्नांनानार्थत्वंदुर्वारमेवानचनानार्थतोपगमेनापिनिर्वाहःयद्रूपावच्छिन्न
गोचरव्यवहारजनकत्वंयेनपुंसातदादिपदेनगृहीतंतद्रूपावच्छिन्नेतेनतदुत्पत्तिग्रहेणप्रक्रांतस्यापितदवच्छि
न्नस्यतत्पुरुषीयतदादिपदजन्यबोधविषयत्वानुपपत्तेःनचबुद्धिस्थत्वंप्रकारीभूतघटत्वादीनामेवानुग
मकंतथाचबुद्धिस्थप्रकारवांस्तत्पदशक्यइत्याकारकःशक्तिग्रहःसचतद्धर्मप्रकारेणसामान्यप्रत्यासत्त्या
सकलतद्धर्मविषयकएवेतिनापूर्वधर्मप्रकारेणाबोधानुपपत्तिःसामान्यप्रत्यासत्त्यानाभ्युपगमेशक्तिग्रह

विशेष्यतावच्छेदकाश्रयस्यापूर्वधर्मिणः शक्तिग्रहाविषयत्वेपिशाब्दबोधेभानवच्छक्तिग्रहधर्मितावच्छेदकता
वच्छेदकानुगतरूपाश्रयस्यापूर्वधर्मस्यापिशक्तिग्रहंविनाशाब्दबुद्धौभानंनानुपपन्नःसमानविषयकत्वस्यात
त्रत्वादितिवाच्यंबुद्धिस्थत्वस्यशक्यतानवच्छेदकत्वेनशक्यतावच्छेदकानुगमकत्वायोगात्तदवच्छेदकत्वेचत
स्यापिशाब्दबुद्धौशक्यतावच्छेदघटत्वादिविशेषणतयाभानियमतोभानप्रसंगात्स्वरूपतोघटत्वादिप्रकारक
शाब्दबोधानिर्वाहाच्चउपलक्षणेनापिशक्यतावच्छेदकानुगमेशक्यस्याप्युपलक्षणेनैवानुगमोऽस्तु किंवि
शिष्टशक्त्याद्रव्यादिपदाच्चघटत्वादिप्रकारकबोधप्रसंगभंगायविशिष्टेशक्तिरभ्युपेयतेप्रकृतेबुद्धिस्थत्वस्य
उपलक्षणत्वेपितेनानुगमेनकिंचिद्बाधकमितिचेदस्तुबुद्धिस्थत्वेनानुगतानांप्रकाराणांशक्तिधीविषयता
तथापिसर्वतान्नानानार्थत्वंदुर्वारमेवसाक्षात्परंपरयापदवच्छेदकंतदैक्येनैवतदवच्छेदैकताबुद्धिस्थ
त्वस्यचानथात्वात्तउपलक्षणैक्येनशक्त्यैक्येपहरिपदादिशक्यतावच्छेदकानामप्युपलक्षणीभूतेनानंततो
बुद्धिविशेषविषयत्वादिनाचानुगमसंभवेननानार्थमात्रोच्छेदप्रसंगात्एवंबुद्धिस्थप्रकारत्वांशस्त्यदशक्य
शक्ति इत्याकारकत्वानात्स्वरूपतोघटत्वादिप्रकारकंस्मरणंशाब्दबोधोवानसंभवतितातिमानद्वत्तिपकसंब

धीत्यादिज्ञानानां स्वरूपतो हस्तित्वादिप्रकारकस्मरणानुदयात् स्वरूपतस्तद्धर्मप्रकारकस्मरणे स्वरूपतस्त
द्धर्मप्रकारेणस्य संबंधो ग्रहीतस्तादृशसंबंधिज्ञानस्य कारणत्वात् यथा याभ्यां रूपाभ्यां धर्मिणोः संबंधो ग्र
हीतस्तदेकतरप्रकारकसंबंधिज्ञानात् अपरतद्रूपप्रकारेणैव संबंध्यंतरस्मरणमित्यनुभवस्तथा ॥ पाद
रूपाभ्यां धर्मिणोः संबंधग्रहस्तादृशे कर्मप्रकारकज्ञानादेवतादृशापरधर्मप्रकारेणैव धर्मिस्मरणमित्य
पि तथा च किंचिद्विशेषितप्रकारकं यत्र संबंधज्ञानं तत्र विशेषिततद्धर्मप्रकारकस्मरणस्यानुभवसिद्ध
तया दृष्टापत्तेरयोगात् अन्यथा कदाचित् स्वरूपतस्तत्प्रकारिका कदाचिद्धर्मांतरावच्छिन्नतत्प्रकारिका
स्मृतिरित्यत्र नियामकाभावप्रसंगात् सामान्यलक्षणाप्रत्यासत्तिमनंगीकुर्वतां पुनर् निष्कृतिरेव शक्तिग्र
हविषयस्याप्येवं धर्मस्य स्वरूपतः कथमपि ज्ञानासंभवात् न हि बुद्धिविषयतावच्छेदकत्वेन धर्मांतरविषय
कं ज्ञानं स्वरूपतोऽपरधर्मप्रकारेण बुद्धिं जनयितुं प्रभवति तथा सति समानप्रकारतानियमस्यापि भंगा
दिति ॥ मैवं भगवत्संकेतरूपायां शक्तौ शक्यतावच्छेदकघटत्वपटत्वादावुपलक्षणीभूतबुद्धिविषयतावच्छे
दकत्वप्रकारेण भासमानेन तदादिपदजन्यबोधविषयतावच्छेदकत्वं भासते एवं च बुद्धिविषयतावच्छेदक

वछिन्नंबोधयत्वित्याकारकस्यवासंकेतस्यविषयतायाअननुगतघटत्वपटत्वादिनिष्ठायाअपिअनुगतरू
पावछिन्नतयाशक्तेरैक्यंघटादिपदसंकेतविषयतानांनानाघटव्यक्तिनिष्ठानांघटत्वाद्यनुगतधर्मावछिन्ने
त्वेनपश्वादिपदशक्तिविषयतानांप्रकारीभूतनानालोमादिव्यक्तिनिष्ठानांलोमत्वाद्यनुगतधर्मावछिन्नत्वे
नतत्प्रकारशक्त्यैक्यवत्तद्यपांस्तविशेषस्तत्रघटत्वादिलोमत्वादिषुतत्पदजन्यबोधविषयतावछेदकत्वंभास
तइतितानिविशेषणान्युच्यंतेप्रकृतेचबुद्धिविषयतावछेदकत्वेसर्वनामजन्यबोधविषयतावछेदकत्वंसंके
तेनतावगाह्यतेअपितुमादृशाविषयतासामानाधिकरण्यमात्रमितितदुपलक्षणमितिगीयतेयद्यपिघटा
दिपदसंकेतस्यघटत्वविशिष्टविषयकत्ववत्सर्वनामसंकेतेनबुद्धिविषयतावछेदकत्वेबोधविषयताव
छेदकतानवगाहनेपिसंकेतस्यतद्विशिष्टविषयत्वमक्षतमेवेतिसंकेतविषयेनतद्विशेषणमेवाएवंशक्य
विशेषणघटत्वादिनिष्ठबोधविषयतावछेदकत्वरूपबोधविषयत्वनिष्ठसंकेतविषयतानिरूपितविषयतारू
पशक्यत्वेनतद्वछिन्नत्वमपितथापिबोधविषयतयासंकेतविषयत्वरूपशक्यमात्रापातत्वात्सत्वेनशक्येनतद्विशे
षणांशक्यव्यावर्तकशक्यस्यैवनद्विशेषणत्वात्इतितस्यशक्योपलक्षणतयाआकाशपदजन्यशाब्दबोधेश

द्वाश्रयत्वभानानियमवत्तदादिपदजन्यबोधेनदभाननिर्वाहः एतद्वीजं च तदुपलक्षितघटत्वादिविषयकत्वे
न तद्विषयकघटत्वादिबोधस्यापि संकेतेन विषयत्वं घटादिपदसंकेतस्य घटत्वादिविशिष्टविषयकबोध एव वि
षय इति तज्जन्यबोधे तादृशधर्मभाननियमः जातित्वादिविशिष्टघटत्वाद्यवच्छिन्नस्य तत्पदाद्यधीनबोधेनुबु
द्धिविषयतावच्छेदकतावच्छेदकत्वोपलक्षितधर्मविशिष्टावच्छिन्नविषयत्वावगाही संकेतः प्रयोजक इति तत्र जा
तित्वावच्छिन्नघटत्वादिनिष्ठप्रकारताकबोध एव विषय इति न जातिमानित्याकारकबोधकाले घटबोधः। अथ
किंचित्प्रकारेण भासमाने धर्मेऽवच्छेदकत्वभाने तद्विशिष्ट एव भासते न तु तदुपलक्षित इति नियमः कथम
न्यथा स्वरूपतो घटत्वावच्छिन्नाभाववत्पन जातिमान्नास्तीत्याकारिका प्रतीतिः एवं च बुद्धिविषयतावच्छेदक
त्वोपलक्षिते कथं बोधविषयतावच्छेदकत्वं संकेतेनावगाह्यते इति चेत् अन्ततः अवच्छेदकतायास्त्ववच्छेद्याश्रय
विशेषणतापन्नेसंसर्गविधयाभाने एव तथाविधनियमात् अन्यथा धूमव्यापकतावच्छेदकरूपावच्छिन्नप्रति
योगिताकाभावो नेत्याकारकव्यापकतावच्छेदकत्वोपलक्षितवह्नित्वाद्यवच्छिन्नाभावप्रतीत्यनुपपत्तेः प्रकृते च
तत्पदं बुद्धिस्थप्रकारावच्छिन्नविषयताकबोधं जनयत्वित्याकारकोऽवच्छेद्यावच्छेदकभावप्रकारक एव संकेतो

गीकार्यइत्यनुपपत्तेरभावात्॥ स्वरूपतो घटत्वादिप्रकारस्यैकैकेरणाशाब्दबोधोपयोगीशक्तिग्रहः स्वरूपतो घटत्वा
दिप्रकारकएवपदास्वरूपतो यद्धर्मावच्छिन्नप्रकारकज्ञानसामग्री तदैव स्वरूपतस्तद्धर्मप्रकारेणशक्तिं गृहीत्वा स्व
रूपतः तत्प्रकारेणधर्मिणां स्मरत्वं न तु तं मनुभवति च॥ मानसे च शक्तिग्रहेन व्यवहारदर्शनादेरपेक्षाऽपि त्वसं
सर्गाग्रहसहितोपस्थितेरेवेति यद्धर्मावच्छिन्नेनशब्दादिपदघटितवाक्यव्यवहारो न दृष्टस्तदवच्छिन्नस्यापिमानसश
क्तिग्रहात्बोधः स्यादेव न च व्यवहारदर्शनाद्यविषये मनसाशक्तिनिश्चेतुं न शक्यते विपरीतकोटेरुपस्थिति
मात्रेणभानसंभवात् इतिवाच्यं। तदुपस्थितस्यापि बाधितस्य दोषमंतरेणाभानात् निश्चयस्याप्युपपत्तेः वस्तुत
स्तु कतिपयविषये सर्वनामघटितवाक्यात् प्रयोज्यस्य प्रवृत्तिमुपलभ्यमानः प्रवर्तकज्ञानविषये शक्तिं कल्पय
न्बुद्धिविषयतावच्छेदकधर्मावच्छिन्नस्तत्पदशक्य इत्येवसामान्यतोऽवधारयति एवं च चैत्रोऽस्य बुद्धिविषयता
वच्छेदकधर्मवानिति यदा तेनग्रह्यते तदा तस्य चैत्रस्तत्पदवाच्यो न वेति संदेहो नावतरति यादृशधर्मावच्छेदेन प
दव्यधारितं तादृशधर्मनिश्चयस्य स्वसमानधर्मितावच्छेदककतद्विरोधिकोटिभानविरोधित्वादिति संभवत्येवा
पूर्वैपि विषये मानसः शक्तिनिश्चयः ॰॰ अपितत्पदे चैत्रत्वादिविशिष्टवाचकत्वसंदेहस्य दुरुच्छे॥ न चैवप्रपितद्धर्मप्र

कारकबोधे पदजन्यबोधविषयत्वांशे विशिष्यतद्धर्मावच्छिन्नत्वावगाहीतया संकेतनिश्चयोऽपेक्षितः। प्रमेयत्वा
दि[illegible]विषयकबोधविषयतांशे तदवच्छिन्नावगाहित्वेन संकेतनिश्चये पि विशिष्य घटत्वावच्छिन्नत्वावगाहीत्वे संश
यसंभवे तत्प्रकारकबोधानुत्पादिति विशिष्य चैत्रत्वावच्छिन्नावगाहित्वेन सर्वनामसंकेतनिश्चयासंभवात् क
थं तत्प्रकारबोधस्तेनो भविष्यतीति वाच्यं बुद्धिविषयतावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वावगाहितया निश्चितत्वाच्चै
त्रादेर्बुद्धिविषयतावच्छेदकत्वग्रहस्य विशिष्यतदवच्छिन्नत्वावगाहितासंशयविरोधित्वात् न च तादृशग्रहस्य त
थाविधसंशयविरोधित्वमसिद्धमिति वाच्यं त्वेव पृथिवीवृत्ति निखिलधर्मसामानाधिकरण्यनिश्चयेन विशिष्य घटत्वे

द्रव्य

पृथिवीवृत्तित्वग्रहस्य घटत्वसामानाधिकरण्यसंशयविरोधितावत् तस्याप्यनुभवसिद्धतया दुरपह्नवत्वात् केवि
तु बुद्धिविषयतावच्छेदकत्वेनानुगतधर्मेण सकलधर्मविषयकशक्त्यनुभवे प्रमुष्टबुद्धिविषयतावच्छेदकतांशे
स्वरूपतश्चैत्रत्वादिप्रकारकशक्तिस्मरणं निराबाधमेवेति तन्मूलकमेवापरं चैत्रत्वादिप्रकारकं शाब्दज्ञान
भविष्यतीति किमनुपपन्नं स्वरूपतस्तत्प्रकारकस्मरणे स्वरूपतस्तत्प्रकारकानुभवसंस्कारयोरनपेक्षणात् उद्बोधक
वैचित्र्यादेव कदाचिज्ज्ञानिमानृत्याकारकं कदाचिद्धृत्याकारकं विलक्षणस्मरणमिति नियमोपपत्तेः स्वरू

यतो घटत्वादिप्रकारकानुभवजनितसंस्कारवतो जातित्वादिना घटत्वादिप्रकारकात् संस्कारात् कदाचित् स्वरूप
तो घटत्वाद्यप्रकारकस्य जातिमानित्याकारकस्य स्मरणस्योदयेन स्वरूपतस्तत्प्रकारिकायां स्मृतौ तथाविधा
नुभवसंस्कारयोर्विशिष्य हेतुत्वेपि तदुद्बोधकविशेषविरहस्य तादृशस्मृतिविरहप्रयोजकताया आवश्यकत्वात्
तादृशहेतुतायाञ्च प्रामाणिकत्वात् । कथमन्यथा विशेषणांतरानवच्छिन्नादृष्टशरीरविशेषनिष्ठजातिविशे
षावच्छिन्नसंकेतितरामरावणादिपदेभ्यो वाक्यार्थधीरस्माकं कथं वानि विशेषणानींद्रियजातिविशेषावच्छि
न्नवाचकमनःप्रभृतिपदेभ्योऽस्माकं शाब्दबोधीनन्नजातित्वादिना शक्तिग्रहेण प्रमुष्टजातित्वांशमन
स्त्वादिप्रकारेण शक्तिस्मरणमिति तत्रापि विशेषणांशे मोषमंतरेण गत्यंतराभावादिति वदंति । विवदंते त्व
त्र बहवो विद्वांसः स्मृतेर्विलक्षणप्रकारतायां संस्कारानुभवयोस्तादृशप्रकारतायाः प्रयोजकत्वस्योद्बोध
कविशेषप्रयोजकतामाश्रित्य तद्भेदेन विशेष्यविशेषणभावांशेऽप्युद्बोधकविशेषस्यैव नियामकत्वसंभवा
त् प्रकारत्वविशेष्यत्वानंतर्भावेन सामान्यतस्तद्विषयकस्मृतौ तद्विषयकत्वेनैव संस्कारानुभवयोर्हेतुतायतः
रामरावणादिपदेभ्यः लक्षणया तत्तत्पदार्थत्वादिप्रकारक एवान्वयबोधः वस्तुतस्तु काप्यननुगतोद्बोधकस्य

ले स्वरूपतस्तत्प्रकारकशक्तिज्ञानासत्वे स्वरूपतस्तत्प्रकारकस्मरणापत्या तत्र तादृशज्ञानस्य हेतुत्वमावश्यक
मित्यलं पल्लवितेनान्यत्र सामान्यतो वह्निबुद्धिविषयतावच्छेदकधर्मावच्छिन्नस्य सर्वनामशक्यत्वे शक्तिभ्रमं वि
नाकालांतरीणा बुद्धिविषयतावच्छेदकधर्मावच्छिन्नविषयकप्रतीतिः सर्वनाम्ना न जन्यते अपितु पोपदापस्य
बुद्धिस्थः तदा तत्प्रकारकावच्छिन्नविषयकेवेतिनियमानुपपत्तिः स्वोच्चारणानुकूलबुद्धिविषयतावच्छेदकावच्छि
न्नस्य शक्तिविषयत्वे तु स्वपदस्य तत्तद्व्यक्तिपरत्वापत्त्या व्यक्तिभेदेन शक्तिभेदप्रसंगः अननुगमाद्युत्पत्तिवि
रोधश्च एवं युष्मदस्मत्पदयो रात्ममात्रेन शक्तिः अपितु स्वसंबोध्योच्चारणकर्त्तैरेव संबोध्यतावच्छेदकत्वोच्चा
रयितृतावच्छेदकत्वरूपानुगतधर्मोपलक्षितचैत्रत्वादिकमेव प्रवृत्तिनिमित्तमित्यप्यसंगतं सामान्यतः सं
बोध्यतावच्छेदकत्वादेरनुगमकत्वे चैत्रस्य युष्मत्पदसंबोध्यतानस्मात् युष्मत्पदांतरसंबोध्यमैत्रादेश्चै
त्रोच्चरितादस्मत्पदात्पदांतरोच्चारयितृमैत्रादेः प्रतीतिप्रसंगो दुर्वार एवेति स्वजन्यबोधाश्रयतया वक्तृभि
प्रायविषयतावच्छेदकत्वरूपसंबोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य स्वोच्चारणकर्तृता
वच्छेदकधर्मावच्छिन्ने अस्मत्पदस्य शक्तेः स्वीकरणीयतया स्वत्वांतर्भावेनानुगमकतादवस्थ्यादिति चेन्न

स्वोच्चारणानुकूलबुद्धिप्रकारावच्छिन्नविषयकत्वस्वजन्यत्वोभयसंबंधेनतदादिसर्वनामपदप्रकारकबोध
विषयकः संकेतोऽभ्युपेयतेतत्रच स्वपदार्थस्यसंबंधघटकतयातत्तत्पदव्यक्तित्वेनतदादिपदानांनविषय
ताऽपितुतत्तत्पदत्वादिरूपानुपूर्वीविशेषणेनेवेतितत्पदव्यक्तिभेदेनशक्तिभेदः।सामान्यतः तत्पदत्वादिरूपा
नुपूर्वीविशेषावच्छेदेनैवतदुभयसंबंधावच्छिन्नबोधविशेष्यतानिरूपितसंकेतप्रकारताश्रयत्वेतितत्स्वत्वा
नुपपत्तिः कालांतरीयबुद्धिः नेदानींतदादिपदोच्चारणानुकूलेतितद्विषयतावच्छेदकावच्छिन्नबोधेनतत्पदशि
नसंबंधेनैतत्रतदादिपदवैशिष्ट्यमतोनेश्वरेच्छायांतादृशबोधस्यैतत्तदादिप्रकारेणमानमितितद्धर्मावच्छिन्न
विषयताशक्तिबोधेतदंशेतद्धर्मावच्छिन्नविषयताघटितोक्तोभयसंबंधावच्छिन्नबोधनिष्ठविशेष्यतानिरू
पितसंकेतीयप्रकारतारूपवाचकतायाः प्रकारतयासंसर्गतयावाज्ञानस्यहेतुत्वादन्यधर्मावच्छिन्नबुद्धि
स्वीकृत्यप्रयुक्तेपदेन्यधर्मावच्छिन्नविषयताघटितोभयसंबंधावच्छिन्नसंकेतप्रकारतायाअसत्वेनतत्र
नदवगाहित्वानस्यभ्रमत्वमितिपयमानयुष्मदस्मदस्थलेपितादृशेपवगतिश्चिंतनीयाअयंसंबोध्येयुष्मदः
स्वोच्चारयितरित्वास्मदः शक्तौदेहयुवांनमयानपिहतेनैवगर्भिर्षत्याशक्रदेवतारूत्यादिशब्दादिवाक्यान्देवी

कर्तृकमहिषासुरकर्मकघातादिबोधानुपपत्तिः तत्र देव्युच्चरितत्वस्य महिषासुरादिसंबोध्यत्वस्य चाभावात्
कृष्णादिकर्तृकसुरघकर्मकघातादिबोधस्य च योग्यताभ्रमादापत्तिः कृष्णादेस्तादृशवाक्यप्रयोक्तृत्वात् सु
रथादेस्तत्संबोध्यत्वादिति चेन्न। तत्र तादृशानुपूर्वीप्रकारेण सामान्यप्रत्यासत्त्या देव्यादिवाक्यस्यापि ज्ञाना
त् देवीमहिषासुरयोस्तादृशवाक्यप्रयोक्तृत्वसंबोध्यत्वप्रतिसंधानादेव युष्मदस्मद्भ्यां देवीमहिषासुरादिप्र
तीत्युपपत्तिः यदि च तत्र वक्त्रनुवादकवाक्ययोर्विभिन्नानुपूर्वी तदानुवादवाक्ये तद्व्यक्तित्वादिना विशेषद
र्शनेपि ज्ञानानुपूर्वीप्रकारेण देव्युच्चरितत्वादिभ्रमादेव अस्मात्तु देव्यादिप्रतीतिस्वीकारेणानुपपत्त्यभावा
त् यत्रानुपूर्वीविशेषावच्छेदेनापि विशेषदर्शनं तत्र नेष्यत एव तत्प्रतीतिरिति॥ एवमन्यदीयस्वार्थतात्पर्यकी
च्चारणानधीनोच्चारणरूपं स्वतंत्रोच्चारणमस्मत्पदवृत्तिनिमित्तानुगमकमुक्तस्थले कृष्णाद्युच्चारणं च
न तथा॥ तस्यार्थप्रतिपादनद्वारा देव्युच्चारणाधीनत्वादिति नास्मत्पदाद्व्यादिबोधः स्वातंत्र्येणाहंगच्छामी
त्युच्चारणस्यापि कोगच्छतीत्यादिप्रश्नवाक्यशक्तिग्राहकवाक्योच्चारणाधीनतया स्वार्थपरत्वमुच्चारणविशे
षणं। प्रश्नादिवाक्यं चाहंगच्छामीत्यादिप्रकृतवाक्यतात्पर्यविषयपरत्वाभावात् तदुच्चारणे विशिष्टव्यतिरेकः

स्फुटः॥ज्ञातुरर्थसजातीयं यद्वाक्यांतरं तदुच्चारणानधीनत्वं निवेशयितुमशक्यं शङ्खानुकरणस्थलएव
समानानुपूर्वीकवाक्यापेक्षानियमात् वाक्यार्थानुवादस्थले समानार्थकवाक्यमात्रोच्चारणापेक्षणात् तत्रस्वा
तंत्र्यापत्तेर्दुर्वारत्वात् वस्तुतस्तु वाक्यांतरस्थक्रियाकर्मतापन्नस्वघटितवाक्यार्थप्रत्यायनेच्छानधीनस्वो
च्चारणमेव स्वतंत्रोच्चारणं अनुवादस्थले च दृष्टुवाचेति वाक्यांतरस्थक्रियाकर्मतया तदर्थवाप्रतिपाद
यितुमेवोनुवादकोऽस्मद्घटितवाक्यं प्रयुंक्ते इति न स्वातंत्र्यापत्तिः पश्येत्यत्र प्रकृतवाक्यस्थज्ञानरूपक्रियाक
र्मतापार्थप्रतिपादयितुमेवास्मत्प्रयोगात् तदुच्चारणस्य स्वातंत्र्यनिर्वाहाय वाक्यांतरस्थ इति एतेन चैत्रे
णान्यदीयान्वैत्रः स्फुटं दरदृष्ट्यादिवाक्यादेव वाक्यार्थप्रतीत्याहं स्फुटं दरदृष्टि इति प्रयुज्यते तत्र समानार्थकवा
क्यांतरोच्चारणसापेक्षत्वेपि न स्वातंत्र्यक्षतिः॥ न चास्वपांडित्याभिमानिनो परस्यापमहं पंडित इति ज्ञाना
तात्पर्यस्यान्यदीयोच्चारणस्य स्वातंत्र्यापत्तिः॥ अन्यथैवंरीत्या अव्यवहितोक्तस्थले ऽहं पदेनोच्चारयितृपुरुषवि
षयकप्रतीतिर्यारणेपि अभिमानिनस्तेन प्रत्ययोपि दुरुपपाद एतस्योच्चारणाभावेनास्मत्पदवाच्यत्वादि
तिचेत्सत्यं स्वतंत्रोच्चारयितुः सर्वत्रास्मदर्थत्वे स्मादेवेयमनुपपत्तिः तदेव न स्वतंत्रोच्चरितास्म

त्यदस्यैव तद्वाचकत्वात् निरुक्तस्वतंत्रोच्चारणरहितस्य अस्मदः स्वघटितवाक्यार्थकर्मकवाक्यांत
रस्थक्रियाकर्तृत्वे यैव शक्तिः। एवं च मया त्वयि हते त्वैवेत्यादौ तादृशक्रिया इति देश्च वाचेति वाक्यांतरस्थो
क्तिक्रियैव तत्कर्तृत्वे देश्या इति पूर्वोक्तभ्रमं विनैव तत्प्रतीतिरूपयादपि तु शक्यते स्वघटितवाक्यार्थकर्म
मवाक्यांतरस्थक्रियात्वं च तादृशार्थकर्मकत्वेन वाक्यांतरप्रतिपाद्यत्वेन नाहं पंडित इति विद्वांस पश्ये
त्यादौ दर्शनादिक्रियाया अस्मच्छब्दघटितवाक्यार्थविषयत्वसंभवेपि तेन रूपेण समभिव्याहृतवाक्या
न्तरप्रतिपाद्यतया न तत्क्रियाकर्तृरस्मच्छब्दतः प्रतीतिः अथ इतिपदघटितवाक्यांतरक्रियाप्रतिपत्तावे
व तत्कर्तुर्वाक्यांतरक्रियाकर्तृत्वसंग्रहं तद्घट एव च तद्घटितानुगमकरूपग्रहे पास्मच्छब्दघटितवाक्यघ
क्यार्थप्रतीतौ तस्येति पदाद्युपस्थित्या वाक्यांतरात् क्रियाप्रतिपत्तिरिति अन्योन्याश्रय इति चेन्न वाक्यांतरप्र
तिपाद्यतया वक्तृबुद्धिस्थत्वस्य तत्क्रियायां विशेषणत्वोपगमात् प्रतिपत्तेः एवमपि प्रकरणादिना तादृशव
क्तृबुद्धेर्ग्रहसंभवेनान्योन्याश्रयाभावात् स्वार्थघटितवाक्यार्थविषयकत्वान्वितक्रियाकर्तृतया वाक्यांतरप्रति
पाद्यत्वेन या वक्तृबुद्धिस्तद्विषयतावच्छेदकत्वं प्रवृत्तिनिमित्तानुगमकमिति तु सारं एवं च बुद्धिविषयताक

२०

वच्छेदकत्वस्य प्रवृत्तिनिमित्तानुगमकत्वप्रवाहेऽपि संभवत्येव उच्चारणकर्तृत्वगर्भानुगमकशरीरेऽपि मिश्राणां बु
द्धित्वनिवेशनबीजं तु नावधारयामः ॥ एवं युष्मत्पदप्रवृत्तिनिमित्तानुगमकगर्भे निविष्टस्वसंबोध्यत्वमपि
वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थान्वयगाहिन्या स्वजन्यप्रतीतिस्तदाश्रयत्वेनेच्छाविषयत्वम
नुवादकेन यः संबोध्यते स नानुवादकोच्चरितयुष्मच्छब्दनिरूपितनिरुक्तसंबोध्यतावान् वक्तुः प्रतिपाद्यतया
युष्मदर्थघटितवाक्यार्थघटितो यो वाक्यार्थकर्मकक्रियाघटितवाक्यार्थस्तद्विषयकत्वविशिष्टप्रतिपत्त्या
श्रयत्वेनैव तस्यानुवादकेच्छाविषयत्वात् यदि चैवेति पदघटितवाक्यार्थप्रतीतिरूपफलेच्छाधीनयुष्मदर्थघ
टितवाक्यार्थप्रतीतिविषयिणी तादृशवाक्योच्चारणप्रतिपाद्यत्वान्वयगाहिन्यपि तादृशवाक्योच्चारणानु
कूला वक्तुरिच्छा संभवतीति तादृशेच्छामादायानुवादकसंबोध्यस्य संबोध्यतापत्तिरिति मन्यते तदा वाक्यान्तरा
र्थप्रतीतीच्छानधीनत्वमपीच्छाविशेषणं देयमिति मया त्वपि हृतेऽत्रैवेत्याहो युष्मच्छब्दान्नमस्करथादिविषयकप्र
तीतिः एवमध्यान्तस्य ततो महिषासुरादिप्रतीतिनिर्वाहाय वाक्यान्तरस्थस्वघटितवाक्यार्थकर्मकक्रियाकर्म
ण्यपि युष्मदः शक्यान्तरं स्वीकरणीयं तत्र देवी महिषासुरमित्युवाचेति वाक्यस्य क्रियाकर्मत्वं महिषासुरादे

रितितस्यापित्वपीत्यादिशाब्दार्थनोपपत्तिः।अत्रापिसर्वत्रस्वघटितवाक्यार्थविषयकत्वान्वितक्रियाकर्मतया
वाक्यांतरप्रतिपाद्यत्वेनयावत्कबुद्धित्वद्विषयतावच्छेदकत्वेनानुगतानांमहिषासुरत्वादीनांप्रवृत्तिनिमित्त
त्वंबोध्यसंबोध्यत्वघटितानुगमकशरीरेचबुद्धिविषयतावच्छेदकत्वनिवेशनेमिश्राणामनुपादेयमेव।संबो
ध्यतावच्छेदकेबुद्धिप्रकारत्वस्याव्यावर्तकत्वात्।अथतात्पर्यसत्वेऽहमंत्रास्मीतित्यादिनैतद्वाक्यस्यास्मच्छ
ब्दाच्चैत्रोपिप्रतीयतेतत्रचैत्रस्यस्वघटितवाक्यार्थकर्मकक्रियाकर्तृत्वाभावात्तदुच्चारणस्यनिरुक्तस्या
तत्वाभावाच्चानुपपत्तिः।एवंमैत्रत्वयाभुक्तमितिमयाश्रुतमित्यादौमैत्रस्ययुष्मच्छब्देनप्रत्यायनात्तस्य
वाक्यांतरस्यक्रियाकर्मत्वाभावात्तस्यनिरुक्तेच्छाविषयत्वरूपसंबोध्यत्वस्यचाभानात्कथमुपपद्यतामि
तिचेत्तर्हिस्वातंत्र्यमुच्चारणविशेषणंसंबोध्यत्वघटकेच्छायांनिरुक्तेच्छानधीनत्वादिविशेषणमप्युपेक्ष्य
मेवमपात्वपीत्यादौतात्पर्यविरहादेवानुवादकत्वसंबोध्ययोर्मपात्वपीत्यादिनाऽप्रतिपादनोपपत्तेः।न
चैवंबुद्धिविषयतावच्छेदकरूपावच्छिन्नस्ययुष्मदस्मदोरपिशक्तिरास्तांकिंसंबोध्यत्वोच्चारयितृतावच्छेदका
वच्छिन्नेशक्तिस्वीकारेणतात्पर्यविरहादेवातिप्रसंगभंगादितिवाच्यं।।तात्पर्यसत्वेपिचैत्रोच्चरितादहंक

रोऽस्मीतिवाक्याच्चैत्रबोधयितुं प्रयुक्तात्वं गच्छेत्यादिवाक्याच्चोच्चारयितृत्वं संबोध्यत्वभ्रमं विनामैत्रादिबोधस्य
सर्वानुभवविरुद्धत्वात् अन्यथा तत्तात्पर्येण स्वरसतस्तथाप्रयोगापत्तेः। इदं त्वं वधेयं अयं पंडित इति जानाति
इत्युवाचेत्यादिस्थले सर्वत्र वाक्यार्थस्य कर्मतानसंभवति बाधितवाक्यार्थस्थले तदसंभवात्। न च बाधितवा
क्यार्थस्थले भ्रमरूपैव तत्कर्मत्वप्रतीतिरिति वाच्यं विशेषदर्शिनामपि भ्रांतिज्ञानेन तथाप्रयोगात् तस्य वा
क्यार्थज्ञानासंभवेन तदनुपपत्तेः। न चाहार्यवाक्यार्थज्ञानादेव विनापि विशिष्टवाक्यार्थबुद्धिं विशेषण
प्रकारकत्वविशेष्यविशेष्यकत्वाभ्यां विशिष्टज्ञानादेव वा विशेषदर्शी तथाप्रयुंक्ते इति वाच्यं एवमपि विशे
षदर्शिनो भ्रांतिज्ञानपुरुषीयतया विधवाक्यार्थबोधानुपपत्तेर्वज्रलेपत्वात् तस्मात्तत्रेति पदं तत्तद्वा
क्यप्रतिपाद्यतावच्छेदकीभूततत्तद्धर्मावच्छिन्नपरं अपि तु तत्तद्वाक्यजन्यज्ञानसमानाकारपरं तादृशश्चेति
पदार्थोऽभेदसंबंधेन यथासंभवं धात्वर्थेतत्वावच्छेदके च ज्ञाने विशेषणमित्येवोपगंतव्यं तथा च सर्वत्रैव
युष्मदस्मद्घटितार्थांतरवाक्यस्थले इति पदं तत्परमेव तादृशवाक्येन चगवित्यव्यमाहेत्यादौ गवादिपदव
त्स्वरूपमेवेति शब्देन परामर्शार्थमुपस्थाप्यते न तु युष्मदस्मच्छब्दार्थघटितो वाक्यार्थ इति संबोध्योच्चार

णकर्त्रोरेव युष्मदस्मदोः शक्तिरिति त्वं स्थूलः अहं स्थूलः त्वं स्वर्गभोक्ष्यसे अहं स्वर्गं भोक्ष्ये इत्युभयत्रैव यु
ष्मदस्मदोः सुख्यत्वात् संबोध्योच्चारयितृशरीरतादृशात्मनोरेव युष्मदस्मदर्थताच्च बोध्या सर्वे घटा इत्येवं त
त्पदादौ सर्वपदादुद्देश्यतावच्छेदकीभूतघटत्वावच्छिन्नस्याशेषताप्रतीतेरशेषत्वं सर्वपदार्थः। न चात्रा
शेषत्वं न विधेयमुद्देश्यत्वादिति तन्नोद्देश्यतावच्छेदकत्वं केवलान्वयितया नाविधेयतात्र विधेयमशेषत्वे
सर्वे घटा जातिमन्त इत्यादौ विधेयमुद्देश्यतावच्छेदकीयसंबंधविशेषेणाशेषत्वेन प्रसिद्धिस्तत्रगत्या भाव्यते
पदान्तरोपस्थितेनोद्देश्यतावच्छेदकघटत्वादिविशिष्टे सर्वपदोपस्थाप्यव्याप्तिविशिष्टघटत्वावच्छिन्नस्य कथं
चिदन्वयसंभवेप्यनुभवविरोधात् घटत्वत्वाद्यनुपस्थितिदशायामपि सर्वे घटा इत्यादिवाक्याच्चयबोध
स्यानुभविकतया व्याप्यत्वेनैव घटत्वादेः सर्वपदार्थत्वस्य स्वीकरणीयत्वात् न चान्वयबोधस्य निर्द्धर्मितावच्
छेदकतयाविपरीतविषयकसंशयाद्यविरोधित्वेनाकिंचित्करत्वापातात् नापि तन्नोद्देश्यतावच्छेदक
व्यापकत्वतद्विधेयवत्त्वं नद्व्यवच्छिन्ने विधेयान्वयप्रसंगात्॥ नापि विधेयस्य च व्यापकतापर्यन्तमेव स
र्वपदार्थः नामार्थद्वयोर्भेदान्वयबोधस्याव्युत्पन्नत्वात् नाप्यभेदेन रूपवदादात्मक विधेयान्वयी घट

२२

त्वादिव्यापक एव तदर्थः। तथा सति सर्वे वेदाः प्रमाणमित्यादौ सर्वपदस्य प्रमाणपदेनैव सामानाधिकरण्या
त्समानलिंगवचनकत्वापत्तिः। सर्वे घटा वर्तन्त इत्यादौ क्रियारूपविधेय व्यापकस्याभेदान्वये सर्वपदस्य
नपुंसकत्वापत्तिश्च व्यापकताया भेदान्वयोपगमेनामार्थधात्वर्थयोर्भेदान्वयविरहनियमानस्य भंगाय
तेः। किंतु अशेषत्वं न सर्वपदार्थः उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयोपगमादेव तल्लाभोपपत्तेः किंच
नेकत्वमेव अनेकत्वं चोद्देश्यतावच्छेदकसामानाधिकरण्यभेदप्रतियोगित्वं अत एव च सर्वं गगनं शब्द इत्यादि
त्यादयो न प्रयोगाः। एवं च सर्वे घटा इत्यादौ घटनिष्ठान्योन्याभावप्रतियोग्यभिन्ना घटा इत्यर्थः प्रतीयते न चै
वं घटत्वादिसामानाधिकरण्यमात्रेण विधेयान्वयतात्पर्येण सर्वे घटा नीला इत्यादिप्रयोगापत्तिः। सर्वप
दार्थविशेषितोद्देश्यतावच्छेदकावच्छेदेनैव विधेयान्वय इति नियमात् सर्वं प्रमेयमित्यादौ प्रमेयत्वादिविधे
यके उद्देश्यवाचक एवत्वादिपदमध्याहृत्यैव प्रतीतिः अन्यथोद्देश्यतावच्छेदकीभूतव्याप्यधर्मानुपस्थित्या
तद्व्यापकतार्थकत्वेप्यनुपपत्तेरिति तदपि न पुष्यते गगनादावपि छिन्नावच्छिन्नतद्भेदसत्वेन सर्वपदस्या
नेकार्थत्वमभ्युपगम्यापि सर्वं गगनमित्यादिप्रयोगस्य दुर्वारत्वात् तन्न उद्देश्यतावच्छेदकसामानाधिकर

णभेदप्रतियोगितावच्छेदकसामान्यतोवास्यतत्तदुद्देश्यतावच्छेदकेसर्वत्रबाधितत्वेनतत्प्रतीतेर्गुरुरूपगमत्वात्सा
मान्यतःप्रतियोगित्वस्यान्यत्वस्यवृत्तिमदवृत्तित्वात्स्वप्रतियोगिवृत्तियोग्यमेनादृशभेदास्तद्वृदकरूदस्यचगुरुत्वगम
नयातद्विशेषणेनतद्धित्वावच्छिन्नव्याप्तेरयिद्धेपत्वात्अस्तुवायथाकथंचितव्याप्तिस्तथाप्यनेकत्वमात्रस्य
सर्वांशद्वार्यत्वेःवच्छेदकावच्छेदेनान्वयेऽवच्छेदकैकदेशाव्यापकताबोधस्यानुभवविरुद्धतयासर्वेघटारूप
वंतइत्यादौघटनिष्ठभेदप्रतियोगित्वविशिष्टघटत्वस्योद्देश्यतावच्छेदकतयाशुद्धघटत्वव्यापकत्वभाना
नुपपत्त्याघटत्वसामानाधिकरण्येनरूपादिमदन्यत्वनियेध्येदृशायामपितादृशवाक्यात्तादृग्बोधापत्ति
दुर्वारैवाएवंविशेष्यतावच्छेदकव्यापकतायाएवविशेषणीभूतविशेषणांशेवाभानात्तत्सर्वेषुघटेषुरूपमि
त्यादौघटत्वादेर्विशेष्यतानवच्छेदकत्वेनरूपादौतद्व्यापकत्वंदुर्लभयापद्येत।नचतत्रसमवायपर्याधेयत्वादे
निरूपकतासंबंधावच्छिन्नव्यापकतासंबंधेनैवप्रकृत्यर्थघटादेरन्वयःस्वीक्रियतेघटादेर्व्याप्यताच्चता
दात्म्येनव्यापकताच्चयादृशरूपावच्छिन्नेआधेयत्वादेरन्वयस्तदवच्छिन्ननिष्ठाधेयत्वत्वाद्यवच्छिन्नासंस
र्गःअतोरूपनिष्ठाधेयत्वादेराधेयत्वत्वादिनाद्रव्यत्वव्यापकत्वेपिनातिप्रसंगःएवंरूपनिष्ठाधेयत्वत्वा

हितां ध्रुवत्वं व्यापकादेः पदानुपस्थितत्वेपि न क्षतिः। तथा सत्यपि तादृशरूपस्य संसर्गघटकतया भानेऽविरोधादि
ति वाच्यं उक्तव्यापकतायाः संसर्गत्वे मानाभावात्। अस्तु वा उद्देश्यविधेययोर्विशेष्यविशेषणभाववैपरी
त्येपि विधेयांशे उद्देश्यतावच्छेदकव्यापकस्यैवोद्देश्यविधेयभावमहिम्नैव संसर्गतया भानं भवतु च उद्देश्यविशेषण
तयोपस्थितस्यापि विधेये स्वातन्त्र्येणान्वयोऽव्युत्पत्त्यविरुद्धो नामार्थयोरपि भेदेन पारतन्त्र्येणान्वयोऽव्युत्पत्त्यवि
रुद्धः। तथापि सर्वपदस्य यत्र विधेयवाचकपदसामानाधिकरण्यं तत्र विधेयतावच्छेदकांशे उद्देश्यस्य तत्संबं
धस्य वाऽनुभवसिद्धव्याप्तिबोधो दुर्घट एव एवं घटेन सर्वाणि रूपाणि अपि तु कानिचिदेवेत्यादौ रूपनिष्ठ
भेदप्रतियोगिरूपत्वावच्छिन्नाभावो घटादौ वाधितत्वस्य योग्यतापत्तिः। न च तादृशरूपत्वादिसामानाधिकर
ण्येन घटादिवृत्तित्वाभावः प्रतीयते स च वाधित एवेति न क्षतिः समभिव्याहृतस्थलेऽशेषत्वमानानुपगमे
क्षतिविरहादिति वाच्यं एवं सति तत्र घटत्वावच्छिन्नस्योद्देश्यत्वानिर्वाहात्। न च तत्र रूपस्योद्देश्यत्वेप्रय
ममतिर्दिष्टत्वात् अवोच्यते उद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिकोधर्मः सर्वपदप्रवृत्तिनि
मित्तं सर्वे घटाद्दृत्यादौ तथाविधधर्मो घटनिष्ठपावत्वमेव तस्य च व्यासज्यवृत्तितया तस्य पर्याप्तिर्घटत्वव्या

दि

पकत्वात् रूपादिव्याप्यत्वात् घटत्वादिव्यापकत्वरूपादिव्याप्यत्वलाभेन तयोरपि व्याप्यव्यापकभावोऽयो
लुप्यते। द्रव्यत्वादिव्यापकपर्याप्तिरूपाद्यव्याप्यत्वात् सर्वाणि द्रव्याणि रूपवंतीत्यादावयोग्यता उद्देश्य
तावच्छेदकव्यापकत्वं च तत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वं तेन रूपादिव्याप्त
पर्याप्तिर्द्रव्यनिष्ठात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्वेपि न क्षतिः घटत्वे व्यापकयावत्वपर्याप्ति
श्च न घटादिव्यक्तिभेदो यतोऽनेन न घटत्वादिव्यापकतानुपपत्तिः। विधेयव्याप्यत्वं च व्यभिचारित्वसंबं
धावच्छिन्नप्रतियोगिताकतत्तद्विधेयतावच्छेदकावच्छिन्नप्रतियोगिताकतत्तद्विधेयाभाववत्वं अतो वि
धेतावच्छेदकावच्छिन्नस्य पक्षे केवलान्वयितातत्वेनाप्रसिद्धिः। व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताक
स्यैव तथाविधाभावस्य प्रसिद्धत्वात् अत्र चोद्देश्यविधेयतावच्छेदकघटत्वरूपत्वादीनामुपलक्षणतया
ऽनुगमकं तादृशावच्छेदकत्वं अतो न शक्यतानेत्यं नवा एवं धर्मव्यापकत्वादिभानानुपपत्तिः। नवा ताद
शावच्छेदकत्वभानापत्तिः यद्यपि सामान्यत उद्देश्यतावच्छेदकत्वमव्यावर्तकमेव उद्देश्यतावच्छेदकविध
यास्वसमभिव्याहृतपदप्रतिपाद्यत्वे चेद्दशपदजन्यशाब्दबोधान्नागुर्ग्रहं। तथापि तादृशप्रतिपाद्यत्वेन व

क्तबुद्धेर्वक्तृतात्पर्यस्य वा विषयत्वं तथा वाच्यं। तत्र प्रकरणादिना पूर्वं संग्रहमेव स्वत्वानानुगमः एवं च
त्समाधेयः। उद्देश्यविधेयभावश्चानविशेष्यविशेषणभावनियतः। अतः सर्वेषु घटेषु रूपमित्यादावपि
घटत्वादिरूपत्वायोरुद्देश्यविधेयतावच्छेदकभावोस्तु एवेति न घटत्वादिव्यापकरूपत्वावच्छिन्नव्याप्य
पर्याप्तिकत्वापावत्वहानानुपपत्तिः। इयं च सत्यतिरुद्देश्यवाचकपदसमानाधिकरण्यासर्वपदे विधे
यवाचकपदसमानाधिकरण्यासर्वपदस्य विधेयतावच्छेदकव्यापकोद्देश्यतावच्छेदकावच्छिन्नसंबंधव्या
प्यपर्याप्तिकयावत्त्वमर्थः। अतः काले सर्वे वृत्तिमंतः कालः सर्वधर्मवानित्यादौ सर्वपदे न वृत्तिमत्त्वादि
व्यापककालादिसंबंधव्याप्यपर्याप्तिकंयावत्त्वं प्रतीयते अथवा स्वार्थान्वयितावच्छेदकधर्माव्यापकतार
शधर्मावच्छिन्नान्वयितावच्छेदकावच्छिन्नव्याप्यपर्याप्तिकधर्मावच्छिन्नं सर्वपदार्थः इति उद्देश्यविधेयभावं
विशिष्यानिवेश्य सर्वसाधारणैकव्युत्पत्तिरेव स्वीक्रियते अन्वयित्वं च विशेषणसाधारण्यो सर्वं प्रमेयमि
त्यादौ वस्त्वादिपदाध्याहारमंतरेणाबोधोपगमे तदनुरोधेनान्योन्याभावप्रतियोगितावच्छेदकविधेय
व्याप्यपर्याप्तिकयावत्त्वार्थकतापि सर्वपदस्य स्वीकार्या अयं सर्वं पदं वेत्तीत्यादौ एतदीयपदज्ञानविषयत्वाद्य

नन्वयानादृशधर्मो नान्वयितावच्छेदकः। अन्वयितावच्छेदकविषयतानवच्छिन्नव्याप्यत्वमतिप्रसंजक
मितितन्नापि मुख्यत्वं तरं स्वयमूहनीयं। अत्र न सर्वाणि रूपाणीत्यादौ नञर्थप्रतियोगिविशेषणात्मक
सर्वशब्दस्य स्वार्थान्वयितावच्छेदकरूपत्वादिव्यापकपर्याप्त्यर्थकतया तदवच्छिन्नाभाव एव प्रतीयते व्या
सज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकश्च यादृशाभावो घटादावबाधित एवेति नायोग्यता न चाव्यासज्य
वृत्तिगुणत्वादिपर्याप्तिरपि रूपत्वादिव्यापकतया गुणत्वादिसाधारणरूपत्वादिव्यापकपर्याप्तिकध
र्मावच्छिन्नाभावो न घटादाविति कथमत्रायोग्यतेति वाच्यं। अव्यासज्यवृत्तिगुणत्वादेरेकैकमात्रवृत्ति
धर्मावच्छिन्नपर्याप्तिकत्वस्यैव सर्वाणि रूपाणि गुणा इत्यादिप्रतीत्यवगाहनात् सर्वसाधारणैकपर्याप्त्यो
मानाभावात् प्रत्येकवृत्तिधर्मावच्छिन्नपर्याप्तिषु रूपत्वादेर्निरुक्तव्यापकत्वाभावात् सर्वद्रव्यं न रूपवदित्या
दौ द्रव्यत्वादिव्यापकत्वसामानाधिकरण्यमभावस्य प्रतीयते अतो नायोग्यता अनुयोगिविशेषणावच्छेदे
नैव नञाभावः प्रसाध्यते द्रव्यं न रूपवदित्यादिप्रयोगादर्शनादिति। कथमेतदुपपद्यतामिति तु नाशंकनीयं अ
व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावबोधे तथानियमात् यत्तु स्वरूपसंबंधात्मकं अभावानुयोगि

तावच्छेदकत्वमनुयोगिविशेषणे नञ्पदजन्याभावप्रतीत्यागृहीते द्रव्यत्वादौ न तादृशरूपवद्घटाद्यनुयोगितावच्छे-
दकत्वमतो द्रव्यं न रूपवदित्यादौ प्रयोगाः । व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावोपगमेन च सर्वं
द्रव्यं न रूपवदित्यादिप्रयोगो व्युत्पादनीयाः । न च व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावोपगमे नैकस्या
पि रूपादेः सर्वघटादिपर्याप्तिरस्तीति सर्वघटत्वावच्छिन्नेपि रूपादिमद्भेदसत्त्वेन सर्वे घटा न रूपवन्त इत्यादिप्रयोगा
पत्तिरिति वाच्यं । रूपादिपर्याप्तित्वेनानुगतप्रतीतीनामनतिप्रसक्तत्वेन घटादिनिष्ठपावत्त्वादिनाप्यवच्छेदात्तद
वच्छेदेन रूपादिमद्भेदवत्त्वो विरोधाद्द्रव्यत्वादिव्यापकयावत्त्वस्यातिप्रसक्ततया निरूपादिपर्याप्तित्वावच्छिन्ना
नामप्यनवच्छेदकतया तदवच्छेदेन रूपादिमद्भेदवत्त्वाविरोधादिति तदसत् उक्तरीत्यैवोपपत्तौ प्रतियोगि
तावच्छेदकादिमतितत्त्व्यसाधारण्याद्व्यासज्यवृत्तिधर्मावच्छेदेनान्योन्याभावादिस्वीकाराभावात्तादृशाभावो
पगमे प्रतिबंधकसमवहितेपि देशे व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकप्रतिबंधकाभाववत्त्वात्कार्योप
त्तेः । तत्र कारणतावच्छेदकेकोटौ विशेषणांतरं प्रक्षिप्यापत्तिवारणे च गौरवात् अथ घटे सर्वं द्रव्यं न रूपवदित्या
दौ द्रव्यत्वादिव्यापकपर्याप्तौ विधेयीभूतरूपवद्भेदव्याप्यत्वस्य बाधितत्वादयोग्यत्वं दुर्वारमेवेति चेन्न तत्र

विधेयव्याप्यत्वमानानभ्युपगमात् खंडशोभिन्नशक्त्यनुपगमेन क्वचित् तादृशपरित्यागेन तद्बाधे विरोधविरहात् ॥ सर्वं
गगनमित्यादिप्रयोगाभावाधावत्ववदनेकत्वमपि सर्वपदार्थः । न च स्वार्थाभेदान्वयोद्देश्यतावच्छेदकसमानाधिक
रणाभेदप्रतियोगित्वमेव भेदस्य सामानाधिकरण्यप्रतिरूपत्वोभयसंबंधेन प्रतियोगिताविशिष्टान्योन्याभावः । अ
तो द्वित्वाद्यवच्छिन्नभेदाभावापत्तेरिति प्रसंगः । एतादृशोभयधर्मावच्छिन्ने शक्तिरेकैव तत्तो नैकधर्मपरित्यागप
रमादायबोधः कदाचिदपीति तत्कतिपयानेकतात्पर्येणाशेषैकतात्पर्येण वा सर्वपदं प्रयुज्यते चैत्रो दधि भुंक्ते
मैत्रः पयो भुंक्ते देवदत्तो घृतं भुंक्ते विष्णुमित्रः सर्वमेवैषां दोः सर्वपदेन प्रत्येकं दधिपयोघृतानां भोजनकर्मतया
प्रतिपादनाय तद्रूपावच्छिन्नयत्तातरोपस्थाप्यार्थे स्वार्थान्वयस्तद्रूपावच्छिन्नावच्छिन्नतयायावद्धर्मावच्छिन्नाः प्रकारी
ताः प्रत्येकं तावद्धर्मावच्छिन्नेषु सर्वपदस्य शक्त्यंतरमंगीकार्यं तद्रूपाक्रांतानेकधर्मावच्छिन्नान्वययोग्यता वि
रहे वाक्यस्याप्रामाण्यात् तादृशस्थले तथाविधसकलधर्माणामेवान्वयितावच्छेदकतया भानमिति पमः । तन्नि
बोधिकात्व तथाविधयावद्धर्मप्रकारकबोधं जनयतु सर्वपदमित्याकारकसंकेतरूपाविलक्षणाशक्तिरेव
तादृशशक्तिज्ञानेनेकधर्मप्रकारकबोधजनने परामर्शतथाविधधर्मप्रकारकबोधसामग्र्याः पुष्पवंतप

दृष्टान्तेन चंद्रत्वस्यपर्यन्तयोरेकतरप्रकारकबोधजनकत्वेनेप्रकारकबोधसामग्र्या एवमप्रयोजकत्वोपगमात् तत्र
प्रक्रान्तानां दध्यादीनां प्रत्येकमन्वयेवाक्यभेदापत्त्या साहित्यप्रकारेण तावत्पदार्थबोधकत्वमेव सर्वपदस्य
किन्त्वोयेपतेइतिवाच्यं साहित्यविशिष्टान्वयस्य समभिव्याहृतपदार्थयत्रवाधस्तत्रापितथाप्रयोगात् वाक्य
भेदस्यचगत्यन्तरविरहेणेष्टत्वात् ० अत एव प्रत्येकं पुत्रपश्वादिरूपफलकामकर्तव्यतयाप्रत्यक्षतन्नाभिधा
याभिहितेन सर्वेभ्यो दर्शपौर्णमासावित्यनेन मिलितानां तावत्फलानां दर्शपौर्णमासकर्तव्यताप्रयोजक
कामनाविषयत्वं न प्रतिपाद्यते प्रक्रान्तवाचिना सर्वनामशब्देन मिलितत्वेन फलानुपस्थापनात् अपितु
प्रत्येकमेवेति प्रत्येकफलकामस्यैव तत्राधिकार इति यागसिध्यधिकरणसिद्धान्तः संगच्छते किंपदस्या
जिज्ञासितेशक्तिः। अत एव स्त्रीयजिज्ञासाज्ञापनाय किंपदघटितप्रश्नवाक्यंप्रयुज्यतेतत्रोद्देश्यवाच
कर्किंपदस्य समभिव्याहृतपदोपस्थाप्यतावच्छेदकधर्मावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वे
न वक्तृजिज्ञासितो धर्मः प्रवृत्तिनिमित्तमुपस्थाप्यतावच्छेदकत्वं तमुपलक्षणतया ऽनुगमकं शाब्दबोधे
तद्भानात् एवं च कः पचतीत्यत्र पाककृतित्वावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन जिज्ञासि

त्तोयोधर्मस्तच्छून्यत्पचतीत्याकारकोऽन्वयबोधः प्रतिपाद्यते किंचिद्धर्मावच्छिन्नोद्देश्यतानिरूपितपाककृतित्वा
वच्छिन्नविधेयताशालित्वात् नं भवतीत्याकारिकायाजिज्ञासायास्तादृशबोधविषयकत्वपानादृशेच्छाविषयीभूत
त्वात् अत एव कोब्राह्मणः पचतीत्युत्तरवाक्यात् तन्निवृत्तिरिति तादृशप्रश्नानंतरं तथैवोत्तरं प्रयुज्यते न चैवं प्र
मेयं पचतीत्युत्तरवाक्यमेव न तादृशप्रश्नानंतरं प्रयुज्यते तज्जन्यज्ञानस्यापि तादृशेच्छाविषयत्वादिति वा
च्यं जिज्ञासाविषयीभूतज्ञानविधेयन्यूनवृत्तिधर्मावच्छिन्नएव तादृशाकिंपदशक्यत्वस्युपगमात्तदभेदेनस्वा
र्थान्वितोद्देश्यवाचकपदांतरसमभिव्याहृतकिंपदशक्यतावच्छेदकगर्भस्वार्थाभेदान्वयितावच्छेदकत्वो
पलक्षितधर्मन्यूनवृत्तित्वमपिधर्मांशेविशेषणं देयमतः कोब्राह्मणः पचतीत्यादिपदानंतरं चैत्रः पच
तीत्यादिकं प्रश्नोत्तरवाक्यं प्रयुज्यते न तु मनुष्यः पचतीत्यादिकं मनुष्यत्वादेर्ब्राह्मणत्वाद्यन्यूनवृत्तित्वात
दवच्छिन्नोद्देश्यकत्वेन ज्ञानविषयेच्छाया अस्तथाप्रमीतेः एवं यत्रोद्देश्यतावच्छेदके किंपदार्थतया भेदेनान्व
यस्तत्र तदन्वयितावच्छेदकधर्मावच्छिन्नविशेषणतापन्न किंपदार्थान्वयितावच्छेदकधर्मव्याप्यवृत्तिधर्मा
वच्छिन्नोद्देश्यतावच्छेदकताकप्रकृतविधेयताज्ञानगोचरेच्छा किंपदेन बोध्यते एवंच प्रकृते सत्ता निष्ठावि

धेयतानिरूपितघटत्वमुद्देश्यतावच्छेदकतानिरूपितसंख्यात्वन्यूनत्वनिधर्मिष्ठावच्छेदकत्वेनजिज्ञासितोधर्म
कुत्रेर किंपदार्थः अत्र कतिघटाः संतीत्यादौ इतिप्रश्नपर्यायेसंख्यादौ किंपदार्थस्यजिज्ञासितधर्मावच्छिन्न
स्याभेदान्वयात्संख्यात्वन्यूनत्वातिदशत्वत्वाद्यवच्छिन्नोद्देश्यतावच्छेदकताकबोधजनकंदशसंख्याकाघटाः
संतीत्युत्तरंतत्रप्रयुज्यतेयत्रवोद्देश्यतावच्छेदकीभूतविभक्त्याद्यर्थभेदेनकिंपदार्थान्वयः कस्यपुत्रः स्कंद
इत्यादौतत्रयादृशसंबंधेनपदवच्छिन्नेनतदन्वयस्तत्रतादृशसंबंधेनविशेषधर्मावच्छिन्नविशेषिततदवच्छि
न्नोद्देश्यतावच्छेदकताकप्रकृतविधेयतानगोचरेच्छाप्रतीयतेएवंविधेयवाचककिंपदस्यसमभिव्याहृ
तपदोपस्थाप्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकतयाजिज्ञासितो
यो विशेषधर्मस्तदवच्छिन्नेशक्तिरिति अर्पकइत्यादौइदंत्वाद्यवच्छिन्नांशेविधेयतावच्छेदकत्वेनजिज्ञासि
तधर्मवानित्याकारकोबोधः। तेनतद्विषयकजिज्ञासाविषयीभूतज्ञानजनकंचायंब्राह्मणइत्याद्युत्तर
वाक्यंतादृशप्रश्नानंतरंप्रयुज्यतेएवंविधेयेविधेयतावच्छेदकेवाकिंपदार्थस्याभेदेभेदेनवान्वयः। इ
दंकिंद्रव्यंइदंकिंधनंभवतःपुत्राः कतिभवान्कस्यपुत्रइत्यादौरीतिः। हर्ब्रवहनीयाकिं भिंदुः किंपश्यसि

त्यादौऽज्ञाप्यपि किमो वा शब्दस्यैव वितर्कोऽर्थः ।। वितर्कश्च प्रयोक्तुः संभावनात्मकं ज्ञानं तद्विषयस्य च विशेष्यतासं
बंधेन प्रथमांतपदोपस्थाप्यविशेष्यप्रकारितासंबंधेन तत्र च विशेषणस्य चंद्रादेरन्वयः ।। नामार्थेनान्यपदार्थ
स्याभेदान्वयेऽविरोधात् यत्र विशेषणवाचकमपि प्रथमांतं तत्राभेदसंबंधावच्छिन्नप्रकारितासंसर्गेणान्वयः यत्र तु
प्रकृत्यर्थस्य विशेष्यतया स्वार्थबोधकं विभक्त्यंतं पदं तत्र किंपदस्य तेनादृशविभक्त्यंतसमुदायार्थस्य विशेष्य
तादृशसंबंधेनान्वयस्तादृशसंसर्गावच्छिन्नप्रकारतैव तादृशार्थस्य किंपदार्थे संसर्गोऽतः किमिंदुरित्यादौऽभे
देन चंद्रादिप्रकारिका धनमिदं किं त्वेदित्रस्येत्यादौ वा स्वत्वसंबंधेन चैत्रस्वत्वादिप्रकारिका संभावनाति
यमतः प्रतीयते किं मिंदुरित्यादौ संभावनाबोधोत्तरं तत्प्रयोजकाल्हादकत्वादिसाधर्म्यप्रतीतिस्त्वार्थादिति
कुत्सार्थकमपि किं वितर्कि पदं यथा किंगौरित्यादौ तत्प्रतिपाद्यतया वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षित
धर्मावच्छिन्ने यत्पदस्य शक्तिः ।। अत एव यत्पदेनार्थप्रत्यायनेनियमतस्तत्पदापेक्षा तत्पदसमभिव्याहार
ज्ञानं विनोक्तानुगमकधर्माग्रहेण शक्तिपरिच्छेदस्यासंभवात् मद्वक्तृजन्यप्रतिपत्तिपूर्वमपि तत्प्रतिपाद्यत
यावक्तुरभिसंधिः प्रकरणादिनास्फुटप्रहे इति न तद्वक्तृजन्यप्रतीतेर्यत्पदशक्तिग्रहेऽपेक्षा इयं व्युत्पत्तिः प्रक

म्यमाणपरामर्शकपदघटितस्य चैत्रः समागतोप्यत्रावलोकितइत्यादौ चैत्रादिपदोपस्थापितस्य पदबुद्धेनबो
धनात् अत एव साधुः चंद्रमसि पुष्करैः कृतं मीलितं पदमभिसमताधिकइत्यादौ तत्पदासत्वेपि न दोषः ।। एवं प्र
क्रांतस्यैव प्रकृतपदोपस्थापितव्यापारस्याभेदेन मीलनान्वयिनपायषष्ठेनबोधनात् । एवं यं सर्वशैलाहृत्या
दावपि तदनुरोधेन तस्य वप्रयुक्तपदोपस्थापितेपि तस्य शाब्दं यत्तरं स्वीकरणीयं तावता तिप्रसंगश्च स्वप्रयोजकबुद्धि
स्थत्वमंतर्भाव्य वारणीयः ।। एवं प्रत्यपदोपस्थाप्येनत्यदशक्तिर्बोध्या अत एव प्रक्रम्यमाणपरामर्शकमतनहृदे
नापि नियमतोपस्यदसमपेक्ष्यते तमानपमदइहास्तीत्यादितो घटानयनादिप्रतीतेरनुभवविरुद्धत्वात् । प्रक्रांत
परामर्शकस्य तत्तदपेक्षानियमः ।। तदन्वये शुद्धिमतीत्यादौ वैवस्वतादिपदोपस्थाप्यस्यापितच्छेदेन पराम
र्शाद्युपस्थितिश्च स्वविशेष्यकइति हानाधीना प्राह्या अतः पशुरस्तितं पश्येत्यादौ पश्वादिपदोपस्थापि
तलोमादीनां तदादिशब्देन न परामर्शः प्रसिद्धार्थकेमपि न तत्पदं कलाचसाक्रांतिमतीत्यादौ इदमेतदोः
प्रत्यक्षविषयेऽजदसः परोक्षबुद्धिविषये शक्तिः स्वपदस्य समभिव्याहृतपदोपस्थाप्ये शक्तिः ।। समभि
व्याहारश्चात्रैकवाक्यघटकत्वं अथैवं चैत्रः स्वपुत्रं पश्यतीत्यादौ विवरणं चैत्रपुत्रः पश्यति चैत्रभ्राता

वा स्वपुत्रं पश्यतीत्यादौ कथं स्वशब्दे न चैत्रः प्रत्याय्यतां मुख्यविशेष्यवाचकताभ्युपगमे स्वपुत्रदर्शिनं चैत्रं मै
त्रः पश्यतीत्यादौ चैत्रपुत्रबोधानुपपत्तिः । न च तत्रावान्तरवाक्यार्थबोधे चैत्रस्य मुख्यविशेष्यतया नेयम
नुपपत्तिरिति वाच्यं । अन्तराऽवान्तरवाक्यार्थाधिपमन्तरेणाहृत्यैस्यैव विशेष्ये विशेषणमिति रीत्या महावा
क्यार्थबोधे पत्रमात्पर्यं तत्रैव तदनुपपत्तेर्दुर्वारत्वात् न च स्वार्थस्य साक्षात्परंपरया वा पदार्थे विशेषणत्वं ता
दृशार्थवाचकताभ्युपगमे नायं दोष इति वाच्यं एवमपि स्वपुत्रश्चैत्रेण दृश्यत इत्यादौ चैत्रपुत्रबोधानुपप
तेः समभिव्याहृतक्रियान्वयिवाचकत्वमपि न विचारं सहते परंपरक्रियान्वयित्वस्य चैत्रभ्रातास्त्वं पश्य
तीत्यादौ चैत्रादिसाधारणत्वात् साक्षात्क्रियान्वयित्वस्य चैत्रः स्वं पश्यतीत्यादावप्यभावात् क्रियान्वयिप्र
त्ययार्थे साक्षादन्वयित्वविवक्षणान्न दोष इति चेदेवमपि स्वव्यापकवह्निसामानाधिकरण्यप्रभवान् पर्व
त इत्यादौ स्वपदेन धूमादिपरामर्शानुपपत्तेर्वारणमशक्यमेव एवं चैत्रेणावलोकितं स्वपुत्रं मैत्रः प
श्यतीत्यादौ चैत्रपुत्रबोधापत्तिवारणमपि न च स्वपदार्थोपपदार्थघटितविशेषणस्य विशेष्यतावच्छे
दककोटौ यदर्थविशेषणकीभवानि विशते स एव पदार्थः स्वशब्दवाच्यः चैत्रपुत्रः स्वपश्यती

त्यादौ चैत्रस्य भ्राता स्वपुत्रं पश्यतीत्यादौ च स्वपदार्थश्चैत्रस्य विशेषणकोटौ चैत्रघटितार्थस्य धर्मिता
वच्छेदकोटौ च न निविशत इति नातिप्रसंगः। चैत्रावलोकितं स्वपुत्रं मैत्रः पश्यतीत्यादौ चैत्रपदस्य चै
त्रसंबंधिलक्षणया चैत्रपदार्थैकदेशेन न तु पदार्थ इति स्वपदान्न तत्प्रतीतिः। चैत्रेणावलोकितमि
त्यादौ तात्पर्यसत्वे इष्यत एव तत्र तत्प्रतीतिः स्वपुत्रदर्शि चैत्रधनमित्यादौ चैत्रपुत्रदर्शि चैत्र
संबंधित्वाद्यवच्छिन्ने चैत्रीनस्य वाक्यलक्षणाविरहे तु पूर्वभागपरित्यज्य तादृशलक्ष्यार्थपरस्य
केवलचैत्रादिपदस्यैव लक्षणा तन्न चैत्रपुत्रादिप्रतीत्युपपत्तिरिति वाच्यं एवं सति चैत्रस्य भ्राता
स्वपुत्रो दृश्यत इत्यादौ स्वपदेन चैत्रादिप्रतीत्यापत्तेर्दुर्वारत्वात् मैवं साक्षात्परंपरया वा यः स्वार्थस्य
विशेष्यः पश्च समभिव्याहृतक्रियाकारकपदार्थस्तद्बुभपन्न स्वपदस्य शक्तिः। स्वव्यापकवन्हिसामा
नाधिकरण्यं पश्यत इत्यादावस्तीति क्रियाध्याहारात् स्वपदस्य समभिव्याहृतक्रियाकारकवाचकत्व
मक्षतमेवेति न स्वशब्दात्तत्प्रतीत्यनुपपत्तिः। एवं कलशे निजहेतुदंडजः किमु चक्रभ्रमकारिता
गुण इत्यादावपि क्रियाध्याहारात् स्वपर्याय निजपदात्कलशादिप्रतीतिः। स्वव्यापकवन्हिसामाना

धिकरणं धूमस्येत्यादयश्च न प्रयोगाः। इदं तु चिंत्यं ते पदद्वयेषां समभिव्याहृतपदादुपस्थितिस्तद्रूपावच्छि
न्नस्य स्वपदार्थत्वे एकेन ब्राह्मणेन ब्राह्मणांतरं पुत्रदर्शनदशायां ब्राह्मणः स्वपुत्रं न पश्यतीति प्रयो
गानुपपत्तिः। अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकाभावस्य विशेष्ये बाधात् समभिव्याहृतप
दार्थनिष्ठतत्तद्व्यक्तित्वावच्छिन्नस्य तत्तदर्थत्वेपि वह्निकालीनद्रव्यवति ह्रदादौ स्वव्यापकवह्निका
लीनद्रव्यं नास्तीति प्रयोगानुपपत्तेः। तत्तद्द्रव्यपदस्यापि लक्षणापातात् तद्व्यक्तित्वावच्छिन्नपरत्वे म
हानसादेरपि तथा प्रयोगापत्तेः। तथाविधं यत्किंचिद्व्यक्त्यभावस्य तत्राबाधात् तादृशसमभिव्याहृ
तत्स्थले यद्व्यक्तिव्यापकता वह्निस्तद्व्यक्तित्वावच्छिन्नाभावकूट एव निपसतः प्रतीयत इति चेन्न त
थाविधसकलव्यक्तिनिष्ठतत्तद्व्यक्तित्वादीनां युगसहस्रेणापि ज्ञातुमशक्यत्वात् कदाचित्कस्य
चित्तत्ज्ञानसंभवेपि कतिपयतद्व्यक्तित्वाद्युपस्थितिदशायां कतिपयाभावमात्रगोचरप्रतीते
रप्यंगीकार्यतया तादृशनियमस्य दुरुपपादत्वादिति। अत्र केचित् ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ
स्वपदं ब्राह्मणत्वावच्छिन्नार्थकमेव विशेष्यीभूतब्राह्मणत्वावच्छिन्ने च स्वपदार्थघटितस्य ब्राह्म

पायुत्रदर्शनकर्तृत्वादिरूपविशेषणस्यनकेवलमाश्रयत्वादिसंबंधेनान्वयः।अपितुस्वाजन्याश्रय
त्वस्वनिरूपकदर्शनविषयपुत्रजनकत्वोभयसंबंधेनैवएवंत्वतत्रतत्रतादृशोभयसंबंधावछि
न्नतदभावएवप्रसाध्यतेऽतोनोक्तदोषावसरइत्याहुः।एकशब्दस्यकैवल्यादिविशिष्टेशक्तिः
कैवल्यंत्वसजातीयद्वितीयराहित्यंतच्चसजातीयनिष्ठभेदाप्रतियोगित्वंसजातीयत्वंचोद्दे
श्यविशेषणवाचकैकशब्दात्कैवल्यघटकत्वेनाप्रकृतविधेयवत्वरूपंप्रतीयतेतथाश्रोत्राय
मेकोभुंक्तेइत्यादावेतद्देशाधिकरणकभोजनकर्तृनिष्ठभेदाप्रतियोगिन्यपुमत्रभुंक्तइत्याका
रकबोधः।शक्यतावछेदकानुगमकंकदिशाचिंतनीयः।अयंफलमेकंभुंक्तेफलमेकंभुजान
स्तिष्ठतीत्यादौविधेयतावछेदकवछेदकैककोटिनिविष्टवाचकएकपदात्त्वयादृशार्थविशेषणा
तायन्नेपदत्ववछिन्नेस्वार्थान्वयितोविशेषणत्वंतादृशार्थानुयोगिकान्वयप्रतियोगित्वविशिष्ट
तद्रूपावछिन्नानुयोगिकान्वयप्रतियोगित्वविशिष्टतद्रूपावछिन्नानुयोगिकान्वयप्रतियोगिनिष्ठभे
दाप्रतियोगित्वरूपंसाजातीयद्वितीयराहीत्यंप्रतीयतेऽतस्तत्रतत्कर्तृकभोजनादिनिष्ठसंसर्गप्रति

योगिकर्मत्वादिनिष्ठसंसर्गप्रतियोगिनिष्ठभेदाप्रतियोगित्वं फलादौ प्रतीयते एकसमानार्थकमात्रादि
पदस्थलेऽपीदृशी गतिरिति कृतं पल्लवितेन गोत्वादिशक्त्यात्संस्थानविशेषरूपाकृतेरपि बोधस्यानुभवि
कतया गोत्वादिजातिवत्तस्यापि गवादिपदवाच्ये विशेषणं तस्याश्च वाच्ये विशेषणं तस्याश्च वाच्यविशे
षणत्वेऽपि न प्रवृत्तिनिमित्तता। साक्षात्संबंधेन वाच्यवृत्तित्वाभावात् अवयवसंयोगादिरूपायास्तस्याः
सामानाधिकरण्यसंबंधेनैव गवादौ सत्वात् तत्र शक्त्या जात्याकृत्योरेकतरविनिर्मोकेणापरभानविर
हात् लाघवोन्नीतोभयविशिष्टे गवादिपदस्यैकैव शक्तिः स्वीक्रियते शक्यविशेषणाभेदेऽपि पुष्पवंतादिपद
वद्बहुपदवच्च शक्त्यैक्यस्य दुरपवादत्वात् यत्तु एकविशिष्टापरावच्छिन्ने शक्तिरिति तदसत् विशेषण
विशेष्यभावे विनिगमनाविरहात् गवाद्यंशे साक्षादुभयप्रकारकबोधस्यानुभवसिद्धस्य दुरुपपादत्वा
च्च। यत्र केवलाकृतिविशिष्टे गवादिपदस्य तात्पर्यं यथा पिष्टकमय्यो गाव इत्यादौ तत्र शुद्धगोत्वाद्यवच्छिन्न
परधेन्वादिपदस्यैव लक्षणयैव जात्याकृतिविशिष्टायामप्येकैव शक्तेरैक्यं जात्याकृतिव्यक्तयः पदार्थ इति न्या
यसूत्रे बहुवचनं तु पेक्ष्य पदार्थ इत्येकवचनान्तनिर्दिष्टवतो महर्षेररण्यं तु मतं मीमांसकास्तु गवादिपदा

नां जातिरेव वाच्या ननु व्यक्तिः व्यक्तिशक्तिमतेपि स्वरूपतस्तस्याः ग्रहासंभवेन प्रकारीभूतायां जातौ शक्ते
स्तदवच्छेदकतायां वाऽवश्यकं कल्पनीयतया व्यक्त्यादौ तत्कल्पनायां गौरवात् प्रयोजनविरहाच्च व्यक्ति
शक्तिमते च जातेरुपलक्षणत्वासंभवः प्रागेव दर्शितः यथा व्यक्तिशक्तिमतेपि गोत्वांशे शक्तिस्तदव
च्छेदकता वा विशेषणानवच्छिन्नैव तथा जातिशक्तिवादिमतेपि स्यात् तथैवेति न गोत्वत्वादिप्रवेशाद्गौर
वशंकापि नहि जातिशक्तिमतेपि शाब्दबोधे सा किंचिद्धर्मप्रकारेणाभासते येन प्रकारभानार्थं प्रकार
विशेषमंतर्भाव्य शक्तिः कल्पनीया अपि तु स्वरूपत एव अथानुमानादिना गोत्वादौ शक्तिग्रहे भवतु
धर्मितावच्छेदकविधया गोत्वत्वादिकमवश्यं विषयीकरोति निर्धर्मितावच्छेदकज्ञानस्यानुमानादिनाऽज
ननासंभवात् तादृशज्ञानस्य विपरीतज्ञानाविरोधितयाऽनुपयुक्तत्वाच्च एवं च तादृशधर्मस्य शक्यतावच्
छेदकत्वं दुर्वारमेव वा शक्तिग्राहकमानेन धर्मितावच्छेदकांशे तदवच्छेदकताग्रहे बाधकाभावात् यदि चा
वच्छेदकताग्रहेपि शक्तिविषयत्वांशे भ्रमत्वं कल्प्यते विषयबाधेनावच्छेदकत्वमेव वा शक्तिग्राहकमानेन
दिग्ग्रहे तत्त्वेव स्वीक्रियते तदा प्रतियोगित्वकारणत्वादीनामपि तु न्याययुक्त्याऽवच्छेदकविलयप्रसंगः। तत्रा

एवं स्ववचत्वात् प्रतियोगित्वादिबुद्धेरवच्छेदकत्वावगाहित्वमन्नवसिद्धं यदि तदांशा कि धिपस्तदवगाहिता
नतथेतिवचनं को वाश्रद्दधातिविशेषाभावात् मान्त्रगोत्वात्वादिकमवच्छेदकं शक्यतायास्तथापि शक्तिता
नकरूपातायां गुरुशरीरगोत्वत्वादेर्धर्मितावच्छेदकतात्मकविषयतानिवेशाद्गौरवं दुर्वारमेव व्यक्तिशक्ति
वादिनास्वरूपतो गोत्वादिनिष्ठधर्मितावच्छेदकत्वस्यैव निवेशादिति चेन्न स्वरूपतः पदविशेषणांशं कौनि
रूपितत्व संबंधेन शक्तिसंबंधेन पदे वा गोत्वादिप्रकारिकायाएव शाब्दधीः स्वीकारात् न हि समवायेन
वजातेः स्वरूपतः प्रकारतेति नियमः प्रामाणिकः घटं जानामीत्यादौ प्रकारितासंबंधेन स्वरूपतो घट
त्वादीनां ज्ञानांशे प्रकारतोपगमात् समवायेन धर्मिविशेषणतायत्नस्यैव संबंधांतरेणान्यत्र स्वरू
पतो भानमित्यपि न नियमः प्रामाण्यस्य परतो ग्राह्यतामते अयं घट इत्याकारकस्य स्वरूपतो घटत्वा
दिज्ञानस्यानुव्यवसायेप्रकारितायां न संबंधेन ज्ञाने वा समवायेन धर्मिविशेषणतानापन्नस्यैव घ
टत्वादेर्ज्ञानात् स्वरूपवाप्रकृतेपि गवादिविशेषणतापन्नस्यैव गोत्वादेः शक्तौ निरूपितत्वसंबंधेन प
दे वा शक्तिसंबंधेन स्वरूपतः प्रकारता गवादेश्च शक्तौ पदे वा परंपरासंबंधेन प्रकारतातादृशी च गवा

दिविषयतानशाब्दबोधजनकतावच्छेदिकेतिपरंपरासंबंधेनप्रकारतायाजनकतावच्छेदकत्वापेक्षयासा
क्षात्संबंधावच्छिन्नप्रकारतायास्तथात्वेलाघवेनव्यक्तिशक्तिसिद्धेर्नावकाशः॥ अथजातिशक्तिमतेपिशा
ब्दबोधेव्यक्तिभानमावश्यकंगौर्नष्टागौर्जातागामानयेत्यादौसमभिव्याहृतान्वयस्यजातौबाधात्परंप
रासंबंधेनतदन्वयोपगमेप्यन्वयितावच्छेदकतयागोत्वत्वादिभानस्वीकारापत्तेःशक्तौगोत्वत्वाद्यंतर्भावा
यत्तेश्चनहिस्वरूपेणपदार्थस्यपदार्थान्वयितयाभानंकश्चित्स्वीकुरुतेस्वीकुरुतेवाप्रकारतयास्वरूपे
णोपस्थितजातेर्भानंविशेष्यतातद्भानंतुनसंभवत्येवनिर्धर्मितावच्छेदकस्यशाब्दबोधस्याप्रवृत्त्याघटतु
पयोगितयातत्स्वीकारासंभवात् एवंचजातिमात्रकवाचकत्वेनाभ्युपगतपदस्यापिव्यक्तिबोधजनक
तायामविवादाद्व्यक्तिशक्तिःक्लृप्तैवभ्रमाजन्यलक्षणाग्रहाजन्यतद्बोधजनकतायाएवतच्छक्तिसाध
कत्वात् अन्यथाजातावपिशक्त्यसिद्धिप्रसंगात् एवंशक्तेरीश्वरसंकेतरूपत्वेव्यक्तिबोधकतायाःप
देऽबाधितत्वेनेश्वरेच्छाविषयतयातस्याअपिशक्यत्वंदुरपह्नवंनहिमीमांसकैर्भगवदाज्ञानुमन्यतइत्य
नावतैवतादृशयुक्त्यनवकाशः॥ तत्साधकबहुतरयुक्तिसचिततदुपन्यासस्यापितदन्तुरत्वापातात्

एवंज्ञानेपदानांशक्तिरित्येतादृशतन्मतेपिव्यक्तिमानसमर्थस्यजानाविवव्यक्तावपित्वाच्यत्वंदुरपह्नव
मेवशक्तिनिरूपकज्ञानविषयत्वरूपस्यान्नस्याविशेषेणाजातिव्यक्त्योःसत्वादितिचेन्नव्यक्तिशक्ताव
स्मार्कनैवमत्यंअपितुव्यक्तिशक्तिज्ञानत्वेनशक्तिज्ञानहेतुतापामेवअतएवव्यक्त्यंशेकुत्वशक्तिरि
तिगीपनेतदंशेतज्ज्ञानानपेक्षणात्अतएवव्यक्तेर्नवाच्यतानहिशक्तिधीविषयतामात्रेणोवताद्द
शविषयतायाअन्वयासाधारणात्अपितुयद्विषयकत्वेनशक्तिज्ञानस्यतद्विषयकशाब्दधीजनक
तातत्वंतद्वाच्यताव्यवहारनियामकंअन्वयांशेकुत्र शक्तिसत्वेपियथानद्विषयकत्वंशक्तिजनक
तायानावच्छेदकंतथाव्यक्त्यंशेतत्सत्वेपितद्विषयकत्वस्यशक्तिज्ञानजनकतापामनवच्छेदकत्वान्न
व्यक्तौतद्व्यवहारः।तद्विषयकत्वस्यशाब्दधीविशेषणत्वाश्वादिपदशक्तिज्ञानस्यगोत्वादिज्ञानविषय
कत्वेनगोत्वादिशाब्दधीहेतुत्वेपिनगवादिपदस्यगोत्वादिज्ञानवाचकतापत्तिः।वस्तुतोयद्विषयक
त्वविशिष्टज्ञानविषयकत्वेनशक्तिज्ञानस्यशाब्दधीजनकतायद्विषयकत्वेनशाब्दधियःशक्तिज्ञान
जन्यतातत्वमेवतथाएतेनज्ञानस्यापिज्ञानपदवाच्यतापत्तिः।शक्यज्ञानविषयत्वेनैवज्ञानपदश

क्तिज्ञानस्य ज्ञानत्वेन ज्ञानत्वज्ञानविषयकशाब्दधीजनकत्वादिति परास्तं कारणत्वस्य कार्यत्वस्य चावच्छे
दकगर्भे गोत्वादिविषयकत्वस्यानिवेशाद्गोत्वादेर्वाच्यतानुपपत्तिः। एवं च गौर्गोपदशक्या इत्याकारिकापि
गोत्वादिशाब्दबोधोपयोगिशक्तिधीः संभवति व्यक्त्यंशे शक्तेरबाधेनान्यथाख्यातित्वापत्तिविरहात्तादृश
ज्ञानस्य शाब्दधीहेतुत्वेपि गोत्वधर्मितावच्छेदकशक्तिज्ञानत्वेन व्यक्तिविषयतामनंतर्भाव्यैव गोत्वप्रका
रकशाब्दबुद्धौ तस्य तथात्वाङ्गीकारे व्याप्यत्वकेरवाच्यतानुपपत्तिः। न चैवं व्यक्त्यंशे शक्तिज्ञानस्यापेक्षितत
यानदंशे शक्तेः कुत्रुत्वानुपपत्तिरिति वाच्यं कार्यकारणभावावच्छेदककोटौ व्यक्त्यनंतर्भावस्यैव तदंशि
कुत्रुव्यवहारनिर्वाहकत्वात् अत एव सामान्यलक्षणापूर्वपक्षे मणिकृतासमानप्रकारकत्वेन शक्तिज्ञा
नशाब्दबोधयोर्हेतुहेतुमद्भावाभिधानमपि न विरुध्यते न च शक्यांशे गोत्वप्रकारकज्ञानस्य गवांशे गोत्व
प्रकारकशाब्दबोधहेतुत्वेपि कार्यकारणभावयोः समानप्रकारकत्वस्याक्षतत्वान्न तद्विरोध इति वा
च्यं शक्यांशे गोत्वादिप्रकारकतामादायासमानप्रकारकत्वस्याभिप्रेतत्वे पूर्वैर्वक्ष्यत इत्यस्यासंगत्याप
त्तेः। अपूर्ववादे समानप्रकारकाल्लिङ्पदजन्याकार्यत्वेन घटादिरूपकार्ये शक्तिज्ञानात्कार्यत्वेनाघ्

र्वविषयकशाब्दबोधइत्येवाभिधानात् शक्त्यंशे शाब्दबोधीयप्रकारप्रकारकज्ञानस्य हेतुतायास्तत्रानु
क्तेः न चैवं जात्यंशे साक्षान्नोऽ्यक्तंशे स्वरूपसती हेतुत्वयिधाविति कुञ्जशक्तिवादइत्यादि चिंतामणि
ग्रंथविरोध इतिवाच्यं मतमेदेन तेनोभयसंगतेः वस्तुतस्तु जातिधर्मितावच्छेदकशक्तिज्ञानस्य हेतुत्वे
व्यक्तेर्विषयतायिकारणतावच्छेदककोटौ निविशते विशेष्यतावच्छेदकत्वेन वृधर्मितावच्छेदकीयवि
षयताविशेषस्य निवेशनीयत्वादवच्छेदकतानिरूपकविशेष्यतायाः व्यक्तिविषयतारूपत्वात्।
एवञ्च व्यक्तेरवाच्यताव्यवहारस्य कथंचिदुपपादनेपि शक्त्यंशे जातिप्रकारकत्वानहेतुतापेक्षया
गौरवं दुर्वारमेव॥ कारणतावच्छेदकेऽधिकविषयतानिवेशात् एवं द्रव्यत्वादिधर्मितावच्छेदकप्र
मात्मकगवादिपदशक्तिज्ञानात् द्रव्यत्वादिप्रकारकशाब्दबोधवारणाय शक्त्यंशे धर्मितावच्छेदकावच्छि
न्नत्वावगाहित्वस्याप्यधिकस्य निवेशनीयतया गौरवमिति।ऽ्यक्तौ कुञ्जशक्तिवादिनामपि शक्त्यंशे
जातिप्रकारकज्ञानहेतुतामतमेव साधनीयः॥ वस्तुतस्तु सर्वत्रलाक्षणिकस्थलेपि अन्वयबोधस्यानु
भविकत्वेन तदुपपत्तये लाक्षणिकस्यानुभावकत्वं दुर्वारमेवेति नस्य लक्ष्यार्थे कुञ्जशप्रसंग इतिना

नुभवजननसामर्थ्यमीश्वरसंकेतोवावृत्तिरूपाशक्तिः।अपितुपदार्थांतरमेव।साचजातावेवकल्प्यते।नच
व्यक्त्युपादाविनिगमनतत्रकुत्रशक्तिरपीतितत्वं।व्यक्तेर्गवादिपदावाच्यत्वेगवादिपदाद्व्यक्तेःस्मरणमनुभव
स्यश्चनस्यात्।नचवाच्यत्वेपिजन्यपस्येवव्यक्तेर्भानंशाब्दबोधेनानुपपन्नमितिवाच्यंतद्धर्मप्रकारकशा
ब्दबोधेतद्धर्मप्रकारकपक्षधर्मोपस्थितेर्हेतुतयागोत्वप्रकारकशाब्दबुद्धौगोत्वादिप्रकारकव्यक्तिस्मरणा
स्यापेक्षणीयतयासंबंधग्राहाविषयतयाव्यक्तेःस्मरणाव्यक्तेःशाब्दानुभवविषयतायाउरुपपादत्वात्।अ
न्वयस्यचभानेशाब्दधियोऽन्वयांशेनिष्प्रकारतयातदुपस्थितेरपेक्षणेनतत्रवाच्यत्वानुपयोगादितिचेद
त्रभट्टाः।पदाद्व्यक्तेर्नस्मरणमनुभवोवाकिंतुआक्षेपादेवव्यक्तिधीः।आक्षेपिकाचजातिरेवाक्षेप
श्चानुमानमर्थापत्तिर्वानचजातिव्यक्त्योर्वैयाधिकरण्येनाक्षेपासंभवः।तादात्म्यसंबंधेनजातेराधेय
तासंबंधेनव्यक्तेराक्षेपकतायाअविरोधात्।वस्तुतस्तुगामानयेत्यादौस्वाश्रयवृत्तित्वरूपपरंपरासं
बंधेनानयनकर्मत्वादौगोत्वादिजातिरन्वयःशाब्दः।तेनसंबंधेनगोत्वादिमत्वंस्वाधेयतासंबंधेनगवा
दिव्याप्यत्वात्गवादिमत्वंविनाऽनुपपद्यमानत्वात्आनयनकर्मत्वादेराधेयत्वादिसंबंधेनगवादिव्यक्तिप्र

काब्वीराक्षेपात्तत्र्व्वसंसर्गघटकतयाशाब्दबोधेव्यक्तिभानेपिकर्मत्वाद्यंशेगोत्वाद्यवच्छिन्नव्यक्तिभानानुरो
धेनाक्षेपादरः।गोत्वंगवाश्रितंगोनिष्ठभेदप्रतियोगितानवच्छेदकधर्मत्वात्किंचिदाश्रितंच जातित्वादित्यनु
मानतोव्यक्तिभानंतुनसार्वत्रिकंतादृशहेतूपस्थितेरसार्वत्रिकत्वात्।गवादिपदात्तादृशरूपेणगोत्वादेरनु
पस्थितेः।अथगवादिपदाद्व्यक्तेरस्मरणेगोत्वादिस्मरणमेवकथमुपपद्यते।गोत्वप्रकारकस्मरणेव्यक्ते
र्विशेष्यतयाभाननियमात्तद्विशेष्यकस्मरणेचव्यक्तिघटितगोत्वत्वादेः प्रकारतानियमात्।व्यक्त्यघटि
तप्रकारस्यसंभवेपिस्वरूपतएवजातेःशक्यतयाधर्मान्तरविशेष्यतयातत्स्मरणासंभवात्।धर्मान्तरप्रका
रेणस्मरणेपिगोत्वाद्यंशेनिष्प्रकारकशाब्दज्ञानासंभवेनतादृशस्मृतेरनुपयोगित्वाच्चेतिचेन्नपदाद्
लोचनरूपस्यैवस्मरणस्योपगमात्।किंचिद्धर्मावच्छिन्नसंबंध्युपरकसंबंधज्ञानाधीनतत्संबंधिस्मृतेः
सप्रकारकत्वनियमेपिनिर्विशेषणाकसंबंध्युपरकसंबंधज्ञानान्निर्विकल्पकस्मरणेबाधकाभावात्।नि
र्विकल्पकस्यसंस्काराजनकत्वेपिविशिष्टज्ञानादितविशिष्टगोचरसंस्काराद्विशेष्यांशानुद्बोधदशायां
केवलविशेषणांशेस्मरणेननविरोधइतिवदंतितदसत्गवादिपदात्स्वरूपतोगोत्वादिज्ञानेपिव्याप्य

तावच्छेदकप्रकारेण तद्बुद्धेः सत्वात् ततोऽप्यन्याक्षेपासंभवात् । नच शाब्दधीविषयेन परंपरासंबंधेन गोत्वादि
विशेषितकर्मत्वादिहेतुता ज्ञानयनादौ गवादिकर्मकर्मकत्वमनुपेयमिति वाच्यं । विशिष्टसाध्यस्य प्रागप्र
तीतेः । एवं गोरानीयतामित्यादौ स्वरूपत उपस्थितस्य गोत्वादेरेव विशेष्यतया भानोपगमे निर्धर्मितावच्छे
दकशाब्दधीस्वीकारापत्तिः एवं गवादौ चानयनकर्मत्वसामानाता तादृशशाब्दबुद्ध्यौरापेक्षतावच्छेदका
वच्छिन्नाविषयकतया ऽपत्यापेक्षानुयोगितापतिश्चेति व्यक्तेः शाब्दबोधे भानमावश्यकमित्यपि बोध्यं
एतेन जातिवाचकपदात् जातिबोधः शाब्दः व्यक्तिबोधस्त्वोपादानिक एवेति श्रीकरमतमनुपादेयं
उपादानस्यार्थापत्तिरूपत्वेन भट्टमतविशेषात् । नच जातिरेव व्यक्तिबोधिका जातिकरणकत्वमे
वोपादानिकत्वं बोधस्येति वाच्यं जातेः प्रमाणान्तरताकल्पनापेक्षया व्यक्तिशक्तिकल्पनाया एवौ
चितत्वात् एवं जातेर्नित्यतया सर्वदैव तद्धेतुकव्यक्तिधीवारणाय जातिहेतुकव्यक्तिबोधे जातिशक्ति
ज्ञानघटिततज्ज्ञानसामग्र्याः सहकारित्वमवश्यमुपगंतव्यं तथा च तादृशसामग्र्या एव व्यक्तिभानप्रयो
जकत्वसंभवे ऽपि जातेः करणकत्वकल्पनमनर्थकं नच जातिनिरपेक्षजातिभासकसामग्र्या व्यक्ति

मानप्रयोजकत्वेव्युत्पत्त्यंशे शाब्दत्वमावश्यकं तथा सति च व्यक्तिवृत्तिज्ञानजन्यव्यक्तिस्मृतिरपेक्षिता
ज्ञातेः करणत्वे च व्युत्पत्त्यंशेऽनौपादानिकत्वमेव न तु शाब्दत्वमिति न तदपेक्षेति वाच्यं। व्यक्तिभानांशे
ज्ञातेः करणत्वेन तदंशेऽशाब्दत्वोपगमसंभवे तदकरणत्वेपि तत्संभवाज्ज्ञातेरकरणत्वे व्युत्पत्त्यंशे की
दृशाकरणस्य जन्यतावच्छेदकधर्मवत्त्वमिति चेत् न कस्यचिन्तावता क्षतिविरहात् व्यक्तेरपि बोधः
शब्दादेव न त्वादेयादिति; व्यक्तिशाब्दबोधविरहेणानुपपत्तिं प्रयोपपत्तिलक्षणात एव तदुपपत्तिरिति मं
डनाचार्यमतं। तदुक्तं ज्ञातेरस्तित्वनास्तित्वे। न हि कश्चिद्विवक्षति नित्यत्वाल्लक्षणायाः व्यक्तेस्तेऽपि वि
शेषणेऽस्ति अस्तित्वानास्तित्ववत्त्यादविनाशो लक्षणाच्च जातिप्रकारेणैव बोधयति न तु व्यक्तित्वादि
नेति नानुभवविरोधः। नीलादिपदस्य शक्त्य नीलादिगुणपुरस्कारेण लक्षणया बोधकत्ववत्
शक्त्य जातिपुरस्कारेण लक्षणया गवादिपदस्य व्यक्तिबोधकत्वेऽविरोधात् स्वार्थान्वयेन रूपे
ण ज्ञाते भवति लक्षणेत्यत्र स्वार्थापरस्य शक्यतावच्छेदकपरत्वात्। अत्रेदं चिंत्यं गवादिपदाल्लक्ष
णया गोत्वादिप्रकारकबोधोपगमे जातिशक्तिरन्वयबोधे नापेक्षते लक्ष्यतावच्छेदकतायाएव

जातिभाने प्रयोजकत्वसंभवात्। न च शक्तिं विना व्यक्तौ शक्यसंबंधरूपलक्षणैव न संभवतीति शक्तेरु
पयोगितेति वाच्यं लक्षणानिर्वाहार्थं जातिशक्तिकल्पने गवादिपदस्य द्रव्यत्वादावपि विनिगमनाविर
हेण शक्तिकल्पनप्रसंगात् द्रव्यत्वादिसंबंधेनापि गवादौ लक्षणासंभवात् प्रयोगविरहस्य द्रव्यत्वादावि
व सातंत्र्येण गोत्वादावि वेअविशिष्टत्वात् लक्षणाघटकतया शक्तेरुपयोगितायां तस्यावृत्तित्वादनुपपत्तेः
स्वातंत्र्येणातथात्वात्। अथाकृतिविशिष्टायामेव व्यक्तौ लक्षणा आकृतिप्रकारेण व्यक्तिबोधस्यनैयापि
कानामप्यनुमतत्वात् स्वातंत्र्येणातथात्वात् न तत्र शक्त्युपस्थापितजातेरन्वय उपगम्यते। न चा● कृताचेव
शति जाति विशिष्टलक्षणेति वैपरीत्यमेव किं न स्यादिति वाच्यं। आकृतेरवयवसंयोगरूपायास्तनंत्यात्तद
पेक्षया एकस्या जातेरेव शक्तिकल्पनौचित्यात् न चावयवसंयोगनिष्ठजातिरेव शक्यास्तु व्यक्तौ तदन्वय
श्च स्वाश्रयघटितपरंपरासंबंधेन स्वीक्रियतामिति वाच्यं आकृतिप्रकारकबोधस्यानुभविकत्वात् तल
क्ष्यार्थव्यक्त्यनुपरक्तायां केवलजातौ प्रयोगविरहश्च न शक्त्यभावसाधकः अप्रयोजकत्वादिति प्रयोगमा
त्रविरहस्यैव तदशक्यत्वेवीजत्वात्। जातावप्रयोगस्यासिद्धत्वात्। तात्पर्यसत्वे च वृत्तिद्वयाधीनबोधो

पगमेक्षतिविरहः। न चैवं केवलमुख्यार्थतात्पर्येणागवविनित्यत्वमिति स्वारसिकप्रयोगापत्तिरिति वा
च्यं शक्यास्वरूपतउपस्थितायां ज्ञाने: समानपदोपात्तधर्मिण्याश्रयतासंबंधेनान्वयस्यैव व्युत्पन्नत्वा
त् न चान्वयितावच्छेदकरूपेणानुपस्थितायां ज्ञातेरन्वया विरुध्यंतां व्युत्पत्तिवैचित्र्येण प्रकारतयास्व
रूपतउपस्थितायां ज्ञातेरन्वयस्वीकारे क्षतिविरहादिति रीत्या चेन्मतेमेतत्परिष्क्रियते तथापि स्वमते
गोत्वाद्यन्वयबोधस्यार्थेगवादौ स्वीकारे तादृशान्वयबोधं प्रतियोग्यताज्ञानादीनां कारणताकल्पनाधि
क्यापत्ते गवादिविशिष्टव्यक्तिशाब्दसामग्रीप्रतिबंधकतायां जातिव्यक्तिविषयकोपस्थितिरूपस्य निवेश
नीयतया प्रतिबंधकतावच्छेदकशरीरगौरवात् जात्याकृतिविशिष्टव्यक्तिशक्तिपक्षसाधीयान्। प्राभा
करास्तु: जातिशक्तिज्ञानादेव जातिप्रकारेण व्यक्तेः स्मरणं शाब्दबोधश्च न तु निर्विकल्पकरूपं जा
तिस्मरणं निर्विकल्पकानभ्युपगमात्। व्यक्तिसंबंधज्ञानविरहेण तदंशानुद्बोधात् व्यक्तिस्मरणासंभव
इति तु नाशंकनीयं व्यक्तिमविषयीकृत्य स्वरूपतो गोत्वादिज्ञानात्स्मरणासंभवेन गोत्वाद्युद्बोधकस्यैव
व्यक्त्युद्बोधकतया उद्बोधकतया उद्बोधकस्य फलबलकल्प्यत्वात् संबंधितावच्छेदकहस्तित्वादिसंबंधग्र

चलात्सर्वाध्याहारस्थलेप्यन्वयबोधोपपत्तिरिति निरांकानवकाशादिति वाच्यं॥ यत्र लाक्षणिकपश्वादिपदाद्गोत्वा
दिप्रकारिकोपस्थितिस्तद्व्यवहितोत्तरद्वितीयादिविभक्तितः शक्त्या कर्मत्वाद्युपस्थितिस्तत्रैव कर्मत्वा
दिविशेष्यकगोत्वाद्यवच्छिन्नप्रकारकशाब्दबोधः। तत्स्थलीयसामग्रीलक्षणाधीनपदार्थोपस्थिते
रध्याहारात्मकोपस्थितिसाधारणरूपमात्रेण हेतुतामते कर्मत्वाद्युपस्थापकविभक्तिप्रकृतिभूतप
श्वादिपदापत्रगोत्वाद्युपस्थितिरपि तु निराकांक्षपदान्तरादनुमानादितोपि तत्राप्युपस्थितेवेति नादशाबो
धस्य तत्रापत्तेर्दुर्वारत्वात् अर्थाध्याहारमतेपि तत्र साकांक्षपदान्तप्रकृतवाक्यार्थघटकस्य कस्याप्य
र्थस्योपस्थितिस्तत्राशाब्दबोधोत्पत्तेरनिष्टत्वादिति चेन्न शक्तिलक्षणासाधारणस्यानतिप्रसक्तवृ
त्तित्वस्य दुर्वचतया शक्तित्वशक्यसंबंधत्वेनैव तयोर्निवेशनीयतया शक्तिलक्षणाधीनपदार्थोप
स्थित्योः कारणत्वभेदस्य व्यक्तिशक्तिवादिनामप्यावश्यकतया शक्त्यधीनपदार्थोपस्थितेस्तद्धर्म
गृहीतशक्तिकपदज्ञानजन्यतद्धर्मप्रकारकोपस्थितित्वेनैव तद्धर्मप्रकारकशाब्दबोधहेतुतायाः क
ल्पयितुमुचितत्वात् न च तद्धर्मावच्छिन्नविषयतानिरूपितशक्तिविषयतानिरूपितविषयताशालि

ज्ञानत्वेनव्यक्तौशक्तिलक्षणाग्रहयोर्व्यक्तिवादिमतेनुगमःसंभवतिगोसंबंधिशक्तिंपदमित्याकार
कंपदशक्यसंबंधिनीगौरित्याकारकेवालक्षणाग्रहेपिगोत्वावच्छिन्नविषयतयासमंपरंपरयाश
क्तिविषयतायानिरूप्यनिरूपकभावसत्वादितिवाच्यंसाक्षान्निरूपितपरंपरानिरूपितत्वयोरनुग
मकरूपाभावात्।पतुवृत्तिसंसर्गकपदप्रकारकज्ञानमेवशाब्दबोधोपयोगिएवंचशक्तिसंसर्गतानि
रूपकपदप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिज्ञानत्वेनतद्धर्मावच्छिन्नविशेष्यकशक्तिल
क्षणाज्ञानयोरेवानुगमःसंभवेत्येवशक्यसंबंधेनार्थांशेपदप्रकारकग्रहस्यापितथात्वात्संबंधि
तावच्छेदकीयविषयितायामपिसंसर्गतात्वसत्वादितिनदसत्।शक्तिकालीनत्वंसंबंधवारणायपदप्रका
रत्वार्थविशेष्यत्वोभयनिरूपितशक्तिनिष्ठसंसर्गिकविषयतानिवेशस्यावश्यकतयाशक्तिसंसर्गक
ज्ञानसंग्राहकेणरूपेणलक्षणाग्रहसंग्रहात् अथधर्मशक्तपदस्यधर्मिस्मरणाशाब्दबोधजनक
त्वेलोमाघात्मकोपाध्यवच्छिन्नबोधकपश्वादिपदस्यापिधर्मिशक्तिविलीपत्तौयुक्तेःसाम्यात्।नचनि
र्विकल्पकरूपस्यस्मरणस्यशाब्दबोधस्यचाऽनभ्युपगमात्।जातिवाचकपदात्व्यक्त्यविषयक

हेयिहरस्त्यादिसंबंधिहस्तिप्रकारादिकानात्मकाद्बोधकबलाद्धस्त्यादिस्मरणेहस्तित्वादेःप्रकारतयाभानवत्
व्यक्तिसंबंधज्ञानमंतरेणापिजातिसंबंधिज्ञानाज्जातेःस्मरणोत्पत्तेःविशेष्यतयाभानविरोधिविरहात्तद्ध
र्मप्रकारकस्मृतौतद्धर्मावछिन्नसंबंधितयागृहीतवस्तुज्ञानस्यहेतुतायामदृष्टरूपोद्बोधकजनितस्मृतौ
व्यभिचारवारणायकार्यतावछेदकसंकोचस्यावश्यकतयाततएवप्रकृतेव्यभिचारानवकाशात्ज्ञातिश
क्तिज्ञानेनियमतोजातिप्रकारेणव्यक्त्यभानात्तज्जन्यसंस्कारान्नियमतोव्यक्तिस्मरणासंभवइतिचेत्का
क्षतिः॥शक्तिविषयकज्ञानानंतरस्यावश्यकतयातज्जन्यसंस्काराद्देवव्यक्तिस्मरणासंभवात्॥अथभवतु
जातिशक्तपदज्ञानाज्जातिप्रकारेणाव्यक्तिस्मरणंतथापितत्प्रकारकःशाब्दबोधोनसंभवतितद्धर्मप्रका
रकतत्धर्मिविषयकशाब्दबोधेप्रकारेणाधर्मिगृहीतवृत्तिकपदजन्यतद्धर्मप्रकारकव्यक्त्युपस्थितेर्हेतु
त्वात्पदेनगृहीतवृत्तिकत्वमात्रनिवेशेघटत्वादिगृहीतवृत्तिकेपदेगोत्वावछिन्ननिरूपितसंबंधांत
रावगाहिज्ञानजन्यगोत्वादिप्रकारकस्मरणाद्गोत्वादिप्रकारकशाब्दबोधापत्तेः तद्धर्मगृहीतवृत्तिकत्व

निवेशेपशुत्वादिप्रकारेणाधर्मिग्रहीतधर्माग्रहीतशक्तिकपश्वादिपदात्पशुत्वादिप्रकारकशाब्दबोधस्यापु
रुणामप्यनुमतस्यानुपपत्तेः।नचप्रकारीभूतधर्मभेदेनकार्यकारणभावभेदस्ययत्रतत्राननुगमेनाव

शाब्द

श्यकत्वात् जातिप्रकारकबोधे जातिग्रहीतवृत्तिकपदज्ञानजन्यस्मरणस्यैवहेतुत्वमंगीकार्यमितिवाच्यम्ए
वमपिजातिमल्लाक्षणिकपदज्ञानात् जातिप्रकारकशाब्दबोधानुपपत्तेर्दुर्वारत्वात् लक्षणाधीनपदार्थो
पस्थितेर्हेतुत्वांतरकल्पने चगौरवात् नचमन्मतेऽध्याहृतस्याप्यर्थस्यबोधविषयत्वेनापदजन्यपदा
र्थोपस्थितित्वेनहेतुत्वेनास्तिकस्यमुक्तानुपपत्त्यवसरइतिवाच्यं।सर्वपदार्थाध्याहृतस्थले ऽन्वयप
बोधवारणायतन्मतेपितादृशहेतुतायाव्यवस्थापितत्वात् नचतथापिपदज्ञानजन्यपदार्थोपस्थि
तित्वघटितकारणतावच्छेदकेनेव्यक्तिलाक्षणिकपदजन्यव्यक्त्युपस्थितेरसंग्रहान्तदोषायाऽध्
ध्याहृतपदार्थोपस्थितेर्येनरूपेणाहेतुताव्यवस्थापितालक्ष्यार्थोपस्थितेरपितत्तद्रूपक्रांततयैवोपप
त्तेः शक्यपदस्यैवानुभविकत्वेनेतिसिद्धांतात्सर्वलाक्षणिकस्थले ऽन्वयबोधानुपगमात्तत्स्थलीयसामग्री

स्मरणाद्यसंभवेन तस्य व्यक्तिस्मरणादिजनकत्वं धर्म्मविषयकस्यापि लोमत्वाद्यवच्छिन्नविषयक
स्मरणादेः संभवात् पश्वादिपदस्थले लोमत्वाद्यवच्छिन्नवाचकत्वोपगमेन धर्म्मिधीः संभवतीति न त
स्य धर्म्मवाचकतेति वाच्यं उपाधेर्द्धर्म्मिनिर्मोकेणाभानसंभवरूपस्य जात्यपेक्षया विशेषस्य सत्वे
पि जातिशक्तिपदज्ञानस्य जातिप्रकारिकायामिवोपाधिशक्तज्ञानस्याप्युपाधिप्रकारकधर्म्मिवि
षयकबुद्धौ कारणताकल्पने बाधकाभावात् उपाधिमात्रशक्तादपि धर्म्मिधीसंभवादिति चेन्न लो
मत्वाद्यवच्छिन्नसंबंधावतया गृहीतात् पश्वादिपदाल्लोमत्वादिना मुख्यविशेष्यकस्यैव स्मरणस्य ध
र्म्मिस्मरणोद्बोधकांतरविरहदशायामुत्पाददर्शनात् तद्रूपावच्छिन्नशक्तत्वेन गृहीताद्धर्म्मावच्छिन्नप्रका
रकधर्म्मिस्मरणस्यापि न प्रमतेः स्वीकारेऽननुभवविरोधात् अविशेषितागोत्वादेः संबंधांतरज्ञानाद
पि धर्म्मिविषयकबोधेन तत्प्रकारकधर्म्मिस्मरणस्येवोपगमेन तादृशस्य शक्तिसंबंधिज्ञानात्
तत्प्रकारकधर्म्मिस्मरणोपगमेऽननुभवविरोधविरहात् अन्यत्रेष्टापत्तेरपि तुकरत्वेन प्रतिबंदेर्वादि

निवर्त्तकत्वायोगात्स्वजन्यभगवादिपदस्यसमवायेनविशिष्टबोधकत्वोपगमेतज्जन्यबोधेगोत्वादेः
समवायएवसंसर्गतयाभासतेनतुसंबंधांतरमित्यत्रकिंनियामकंनहिजातिर्व्यक्तिंविनानभास
तेइतिवत्समवायंविनापिनभासतेइत्यपिनियमःयेनशक्तिज्ञानजन्यबोधेसमवायभानस्याव
श्यकतानतुसंबंधांतरमितिस्यात्।नदादिपदात्समवायमविषयीकृत्यापिसंबंधांतरेणगोत्वा
दिविशिष्टविषयकबोधोदयादितिचेदेवंसतिज्ञानशक्तिरेवादरणीया।तथाचभगवादिपदस्यसमं
वायेनगोत्वादिप्रकारकज्ञानएवशक्त्युपगमात्ततोनाभ्रीतानांसंबंधांतरेणतत्प्रकारकधीत
त्संबंधेनतत्प्रकारकज्ञानेशक्तिग्रहस्यैवतादृशबोधहेतुत्वमितिवाच्यंतांतंतर्भावस्यसमवाय
साधारण्येनसंबंधांतरभानप्रयोजकत्वासंभवादितिकृतंपल्लवितेन॥ ॥इतिश्रीगदाधरभ
ट्टाचार्यविरचितःशक्तिविचारःसमाप्तः॥॥ ॥

[OrderDescription]
,CREATED=02.01.20 13:37
,TRANSFERRED=2020/01/02 at 14:21:45
,PAGES=256
,TYPE=STD
,NAME=S0002436
,Book Name=M-2460-SABD PRAKASH TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF

FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF

FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF

FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF

FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF

FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF

FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,